शास्त्रविशारद-जैनाचार्य-श्रीमद्- विजयधर्मसूरिभ्यो नमः ।

# गद्यबद्ध-श्रीभरटकद्वात्रिंशिका ।


ઇ. ૨૫૯૯
ગ્રં.નં. ૨૯૫૫
૩૮



प्रकाशक—

मेसर्स ए एम्, एन्ड कम्पनी

पालीताणा, काठियावाड.

वीर संवत् २४५२

विक्रम संवत् १९८२

पादलिप्तपुरे बहादुरसिंहजी मुद्रणालये शा अमरचंद बेहेचरदास द्वारा मुद्रिता


मूल्यम् रू. ०-१२-०


P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

આ ગ્રન્થ આચાર્ય શ્રી સાગરાનંદ સૂરીશ્વરજી મહારાજના વરદ હસ્તે ઉ. શ્રી માણેકસાગરજી ગણિ, ઉ. શ્રી કુમુદવિયજજી ગણિ, પં. શ્રી ભક્તિવિજયજી ગણિ, તથા પં. શ્રી પદ્મવિજયજી ગણિના આચાર્યપદારોહણ મહોત્સવ પ્રસંગે, પંન્યાસજી શ્રી નયવિજયજી મહારાજના સદુપદેશથી ભાવનગર નિવાસી શા: વીઠલદાસ ઉમેદચંદ તરફથી

ભેટ.

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

# भरटक-द्वात्रिंशिका.

ॐ नमोऽर्हद्भ्यः। श्रीशारदायै नमः॥

देवदेवं नमस्कृत्य, श्रीगुरूंश्च यथाश्रुतम्। द्वात्रिंशद्भरटकानां, लिख्यन्ते कौतुकात् कथाः॥ १॥

इह हि जगति सर्वैरपि श्रेयोऽर्थिभिः पुंभिर्निःश्रेयसाऽवाप्तये सदापि सदाचरणज्ञानप्रगुणैर्भाव्यम्। सदाचरणपरिज्ञानं च मूर्खजनचरित-यत्तत्स्वबुद्धिकल्पितवस्तुप्रवर्तनाऽनर्थदर्शनेन व्यक्तीभवति, अतस्तद्व्यक्तये मूर्खचरितपरिहाराय च भरटकद्वात्रिंशिका प्रारभ्यते। यथा—

## प्रथमा कथा (१)

समे कार्ये हि सर्वस्य, सर्वे सन्ति सहायकाः। विषमे न पुनः कश्चिद्, धनदश्रेष्ठिनो यथा॥ १॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

तथाहि–भरतेऽत्र श्री श्रीपुरे पुरे महीपतिर्नृपतिरभूत्। तत्र च स्वधनजितधनदो धनदो नाम श्रेष्ठी वसति स्म, समस्तपुरप्रधानः। तस्य स्वरूपनिर्जिताऽशेषविद्याधरीरूपा सुरूपा नाम जायाऽस्ति, श्रेष्ठिनः श्रेष्ठप्रीतिपात्रम्। एकस्मिन् दिने तस्य श्रेष्ठिनो गृहे झगटको नाम [1]भरटको भिक्षायै समायातः। तस्य च भिक्षां ददत्याः सुरूपाया रूपाऽतिशयविस्मयात् चिरतरं चक्षुषी विकास्य निभालयन्तं[2] नैतिकं दृष्ट्वा श्रेष्ठी रुष्टः प्रोवाच-'अरे मूर्ख! भिक्षुकाधम! दुराचार! कस्माद् अतिमात्रं मद्भार्यां विलोकयसि?'। ततः सोऽपि रुष्टः सन् वक्ति–'रे श्रेष्ठिन्! यदि स्वभावान्निरूपयन्तं[3] निर्दोषमपि मां सेर्ष्यतयाऽधिक्षिपसि, तदा बलात्कारेणाऽप्येनां त्वद्भार्यां लात्वैव तव गृहाद् यास्यामि, नाऽन्यथा' इत्युक्त्वा तद्गृहे लङ्घितुमुपविष्टः। तदा श्रेष्ठिना विरूपवचनैर्बहु धिक्कृतोऽपि कथमपि नोत्तिष्ठति, बहूनि च लङ्घनानि जातानि। तदा श्रेष्ठिनाऽतिहितमित्रा-ऽऽरक्षक-मन्त्रि-नृपा विज्ञप्ताः स्वभार्यामार्गणव्यतिकरम्। तदा

१ भरटकः— शिवभक्तो व्रती, भाषायाम्–भरडो। २ भरटकम् ३ पश्यन्तम्।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तैः सर्वैरप्युक्तम्–'भोः श्रेष्ठिन्! सर्वथा त्वया स्वजाया नाऽर्पणीया, अयं मूर्खः क्वापि वाते शयितः, तेनाऽऽलमालं लपति'। श्रेष्ठिनोक्तम्–'स लङ्घनैर्मरिष्यति तदा किम्?'। मित्रादिभिरुक्तम्–'संप्रत्येव म्रियतां, न भवतः किमपि दूषणम्; एवं हि भार्याः प्रार्थ्यमानाः किं केनापि दीयन्ते?'। एवं श्रुत्वा श्रेष्ठी हृष्टः। ततश्च बहुलङ्घनभयेन श्रेष्ठिनाऽचिन्ति–"मृतेऽस्मिन् किमेते मित्रादयो वाङ्मात्रसारा मम सहाया भविष्यन्ति नवा? विलोकयामि। यतः—

"अनागतं यः कुरुते स शोभते, न शोभते यो न करोत्यनागतम्।
वने वसन्तस्य जरा ह्युपागता, बिलस्य वाचो न कदापि निर्गताः ॥ १ ॥"

इति परीक्षायै पूर्वं श्रेष्ठिना मित्राग्रे प्रोक्तम्–'भो मित्र! स जटी बुभुक्षया मृतः, किं करिष्यते?, सार्धमागच्छ, आरक्षकस्य कथ्यते'। तदा मित्रेणोक्तम्–"श्रेष्ठिन्! त्वया न युक्तं कृतम्, एवं मर्तुं कस्माद् दत्तः?, केनापि प्रकारेण कुतो नोत्थापितः?। यत एतद् भवतो

१ वातुलो जातः– उन्मत्तः।

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

महादूषणं जातम्, यदि राजा ज्ञास्यति तदा महाऽनर्थो भावी"। श्रेष्ठिना प्रोक्तम्—"मया भवता-मग्रे पूर्वमेवोक्तं यदुताऽयं लङ्घनैर्मरिष्यति। भवद्भिश्च प्रोक्तम्—मरिष्यति तदा म्रियताम्, इति भवद्वचसा मया नोत्थापितः। अतः कारणादागच्छ, तत्स्वरूपमारक्षकादीनां ज्ञाप्यते, अन्यथा ते लोकेभ्यो वार्तां श्रुत्वाऽनर्थं करिष्यन्ति"। ततो मित्रेण चिन्तितम्—'एतस्याऽन्यायकारिणः साहाय्याद् ममापि दण्डादि भविष्यति, ततः [1]सकाले एव पलायनं श्रेयः'। इति विचिन्त्य प्रोक्तम्—'भोः श्रेष्ठिन्! त्वमग्रतश्चल, अयमहमागच्छामि'। इति श्रेष्ठिनि चलिते स नष्टः। ततः श्रेष्ठिना चिन्तितम्—'अहो! संप्रति कष्टम्, मित्रमपि [2]अमित्रोऽभूत्'। ततः श्रेष्ठिना आरक्षक-मन्त्रिणोरिदं स्वरूपं प्रोक्तम्। ताभ्यामपि श्रेष्ठी तथैव भृशमुपालब्धः। ततो राज्ञः प्रोक्तम्। राज्ञापि प्रत्युक्तम्—"भोः श्रेष्ठिन्! मन्नगरे त्वमेव मुख्यः सर्वमर्यादास्थानं सर्वमान्योऽपि यदि एवमन्यायं कुरुषे तदा को नाम न्यायी भविष्यति?। यतस्त्वया स्वयमेव द्रव्यलोभेन गृहे

१ शीघ्रम्। २ शत्रुः।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# भरटक-द्वात्रिंशिका.

આચાર્ય ... જ્ઞાનભંડાર

ॐ नमोऽर्हद्भ्यः। श्रीशारदायै नमः॥

देवदेवं नमस्कृत्य, श्रीगुरुंश्च यथाश्रुतम्। द्वात्रिंशद्भरटकानां, लिख्यन्ते कौतुकात् कथाः॥१॥

इह हि जगति सर्वैरपि श्रेयोऽर्थिभिः पुंभिर्निःश्रेयसाऽवाप्तये सदापि सदाचरणज्ञानप्रगुणैर्भाव्यम्। सदाचरणपरिज्ञानं च मूर्खजनचरित-यत्तत्स्वबुद्धिकल्पितवस्तुप्रवर्तनाऽनर्थदर्शनेन व्यक्तीभवति, अतस्तद्व्यक्तये मूर्खचरितपरिहाराय च भरटकद्वात्रिंशिका प्रारभ्यते। यथा—

## प्रथमा कथा (१)

समे कार्ये हि सर्वस्य, सर्वे सन्ति सहायकाः। विषमे न पुनः कश्चिद्, धनदश्रेष्ठिनो यथा॥१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तथाहि—भरतेऽत्र श्री श्रीपुरे पुरे महीपतिर्नृपतिरभूत् । तत्र च स्वधनजितधनदो धनदो नाम श्रेष्ठी वसति स्म, समस्तपुरप्रधानः । तस्य स्वरूपनिर्जिताऽशेषविद्याधरीरूपा सुरूपा नाम जायाऽस्ति, श्रेष्ठिनः श्रेष्ठप्रीतिपात्रम् । एकस्मिन् दिने तस्य श्रेष्ठिनो गृहे झगटको नाम [1]भरटको भिक्षार्थं समायातः । तस्य च भिक्षां ददत्याः सुरूपाया रूपाऽतिशयविस्मयात् चिरतरं चक्षुषी विकास्य निभालयन्तं [2]जौतिकं दृष्ट्वा श्रेष्ठी रुष्टः प्रोवाच-'अरे मूर्ख ! भिक्षुकाधम ! दुराचार ! कस्माद् अतिमात्रं मद्भार्यां विलोकयसि ?'। ततः सोऽपि रुष्टः सन् वक्ति—'रे श्रेष्ठिन् ! यदि स्वभावान्निरूपयन्तं[3] निर्दोषमपि मां सेर्ष्यतयाऽधिक्षिपसि, तदा बलात्कारेणा-ऽप्येनां त्वद्भार्यां लात्वैव तव गृहाद् यास्यामि, नाऽन्यथा' इत्युक्त्वा तद्गृहे लङ्घितुमुपविष्टः । तदा श्रेष्ठिना विरूपवचनैर्बहु धिक्कृतोऽपि कथमपि नोत्तिष्ठति, बहूनि च लङ्घनानि जातानि । तदा श्रेष्ठिनाऽतिहितमित्रा-ऽऽरक्षक-मन्त्रि-नृपा विज्ञप्ताः स्वभार्यामार्गणव्यतिकरम् । तदा

---

१ भरटकः— शिवभक्तो व्रती, भाषायाम्—भरडो । २ भरटकम् ३ पश्यन्तम् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तैः सर्वैरप्युक्तम्–‘ भोः श्रेष्ठिन्! सर्वथा त्वया स्वजाया नाऽर्पणीया, अयं मूर्खः क्वापि वाते[1] शयितः, तेनाऽऽलमालं लपति’। श्रेष्ठिनोक्तम्–‘ स लङ्घनैर्मरिष्यति तदा किम्?’। मित्रादिभिरुक्तम्–‘ संप्रत्येव म्रियतां, न भवतः किमपि दूषणम्; एवं हि भार्याः प्रार्थ्यमानाः किं केनापि दीयन्ते?’। एवं श्रुत्वा श्रेष्ठी हृष्टः। ततश्च बहुलङ्घनभयेन श्रेष्ठिनाऽचिन्ति–“मृतेऽस्मिन् किमेते मित्रादयो वाङ्मात्रसारा मम सहाया भविष्यन्ति नवा? विलोकयामि। यतः—

“ अनागतं यः कुरुते स शोभते, न शोभते यो न करोत्यनागतम्।
वने वसन्तस्य जरा ह्युपागता, बिलस्य वाचो न कदापि निर्गताः ॥ १ ॥”

इति परीक्षार्थं पूर्वं श्रेष्ठिना मित्राग्रे प्रोक्तम्–‘ भो मित्र! स जटी बुभुक्षया मृतः, किं करिष्यते?, सार्धमागच्छ, आरक्षकस्य कथ्यते’। तदा मित्रेणोक्तम्–“श्रेष्ठिन्! त्वया न युक्तं कृतम्, एवं मर्तुं कस्माद् दत्तः?, केनापि प्रकारेण कुतो नोत्थापितः?। यत एतद् भवतो

---

१ वातुलो जातः– उन्मत्तः।

P.P. Ac. Gunratnasuri M.S.          Jun Gun Aaradhak Trust

महादूषणं जातम्, यदि राजा ज्ञास्यति तदा महाऽनर्थो भावी"। श्रेष्ठिना प्रोक्तम्—"मया भवतामग्रे पूर्वमेवोक्तं यदुताऽयं लङ्घनैर्मरिष्यति। भवद्भिश्च प्रोक्तम्—मरिष्यति तदा म्रियताम्, इति भवद्वचसा मया नोत्थापितः। अतः कारणादागच्छ, तत्स्वरूपमारक्षकादीनां ज्ञाप्यते, अन्यथा ते लोकेभ्यो वार्ता श्रुत्वाऽनर्थं करिष्यन्ति"। ततो मित्रेण चिन्तितम्—'एतस्याऽन्यायकारिणः साहाय्याद् ममापि दण्डादि भविष्यति, ततः [1]सकाले एव पलायनं श्रेयः'। इति विचिन्त्य प्रोक्तम्—'भोः श्रेष्ठिन्! त्वमग्रतश्चल, अयमहमागच्छामि'। इति श्रेष्ठिनि चलिते स नष्टः। ततः श्रेष्ठिना चिन्तितम्—'अहो! संप्रति कष्टम्, मित्रमपि [2]अमित्रोऽभूत्। ततः श्रेष्ठिना आरक्षक-मन्त्रिणोरिदं स्वरूपं प्रोक्तम्। ताभ्यामपि श्रेष्ठी तथैव भृशमुपालब्धः। ततो राज्ञः प्रोक्तम्। राज्ञापि प्रत्युक्तम्—"भोः श्रेष्ठिन्! मन्नगरे त्वमेव मुख्यः सर्वमर्यादास्थानं सर्वमान्योऽपि यदि एवमन्यायं कुरुषे तदा को नाम न्यायी भविष्यति?। यतस्त्वया स्वयमेव द्रव्यलोभेन गृहे

१ शीघ्रम्। २ शत्रुः।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्षिप्त्वा मारितो भविष्यति!, मदग्रे तु मुधा रावं कुरुषे, अन्यथा किं कोऽपि कस्यापि चार्थो मार्गयति?, इति त्वमेव दण्डार्हः"। ततो राज्ञा स्वसेवकाः प्रोक्ताः—"भो भो भटा! एनं श्रेष्ठ्य-पसदं पापिष्ठं तपस्विहत्याकारकं बध्नीध्वं बध्नीध्वम्, एतदीयं च सर्वं गृहसारमत्रानीयताम्। ततः श्रेष्ठी खिन्नश्चिन्तयति—"अहो! मम एतैरेव प्राक् तथा प्रोक्तं, संप्रति तु विपरीतं भाषन्ते स्वार्थनिष्ठाः परविघ्नसंतोषिणः। सर्वोऽपि लोकः स्वकार्यकारी समे एव सहायो, न तु विषम-कार्ये। यतः—

"वाङ्मात्रमैत्रीमधुरो जनोऽयं, न मूढकार्ये घटते सहायः। अनन्यसाध्यां[2] जठरस्य यात्रां, साधुं जने[3] वासमुशन्ति धोराः॥१॥"

ततः श्रेष्ठिना राजाग्रे प्रोक्तम्—"भोः स्वामिन्! क्षणं प्रतीक्षध्वम्, एकशो गृहे गत्वा सम्यग् विलोकयामि। कदाचिद् यदि जीवन् भवति तदा मानयित्वोत्थापयामि, मया तु श्वसन् मुक्तोऽभूत्"। ततः श्रेष्ठिनाऽनन्यगतिकेन गृहे समेत्य पादयोर्लगित्वा सविनयवचनैः स

१ नीचश्रेष्ठिनम्। २ उदरस्य। ३ निवासमिच्छन्ति।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भौतिक उत्थापितः। प्रोक्तं च—'भो! गृहाण मद्भार्यां सारालङ्कारभूषितां, भोजनं च कुरु, अन्यदपि द्रव्यादि गृहाण'। तदा तदीयविनयवचनाऽमृततृप्तो भौतिक उत्थाय श्रेष्ठिनमवादीत्—'भो! मम सर्वथा स्त्रिया द्रव्येण च किमपि कार्यं नास्ति, अहं ब्रह्मचारी निरीहो भैक्षभोजी भवद्वचनादेव भूनो हठाडुपविष्टः'। ततो भोजनं कृत्वा स स्वस्थाने गतः। श्रेष्ठी आनन्दितः, राजादयोऽपि रञ्जितास्तद्बुद्धिवैभवेन॥

## द्वितीया कथा। (२)

कोऽपि स्वप्नोपलब्धेऽर्थे, प्रवर्तेत नरो जडः। पक्वान्नसंभृतमठी– स्वप्नद्रष्टा यथा जटी ॥ १ ॥

नन्दिग्रामे दुर्मतिनामा भरटको वसति सर्वलोकेभ्यो भोजनाजीवी, स एकदा शरदि कस्यापि कौटुम्बिकस्य गृहे भिक्षार्थं गतः। तेन गृहस्वामिना माहिषं सुशीतलं (पण्डरूपं दधि यथेष्टं दत्तम्। तेन हृष्टेन मठिकामागत्य कण्ठलौल्याद् दधि भुक्तम्, तद्वशान्निशि तस्य निद्रा भृशमागता। ततो निद्रामध्ये स स्वप्नं पश्यति, यथा— " ममैषा मठी सर्वापि त्रिविधपक्वान्न-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

खाद्य-पेयादिरसवतीपरिपूर्णाऽस्ति " इत्यादि। ततो जागरूकः संश्चिन्तयति- " ममैषा मठी सर्वापि भोज्यपरिपूर्णाऽस्ति, अहमेकाकी चैतावता भोज्येन किं करिष्ये ?। सर्वं मुधैव मा विनश्यतु, ततोऽद्य मम यथेष्टदायकं लोकं सकलं भोजयामि, अनृणीभवामि च। ततस्तत्रोत्थाय मठिकायाम् एवमेव तालकं दत्त्वा सर्वोऽपि लोकः सकुटुम्बो भोजनाय निमन्त्रितः। ग्राममध्ये सर्वगृहेषु चुल्हकेषु वारि क्षिप्तम्। एवं मध्याह्ने सर्वस्मिंल्लोके मिलिते भोक्तुं समुत्सुके आसनानि मण्डितानि। पङ्क्तिरुपविष्टा। ततो यावता भौतिको मठीद्वारमुद्घाट्य पश्यति तावता किमपि न पश्यति, रिक्तैव मठी। ततः स तत्र भ्रान्तः इतस्ततः कोणकादिकं सर्वं विलोकयति, परं किमपि न पश्यति। तावता तथैव रात्रिवद् मण्डपे पटीं विस्तार्य स्वप्नार्थं सुप्तः!। लोकाः सर्वेऽपि बुभुक्षया म्रियमाणाः परिवेषणाय तमाकारयन्ति, कथयन्ति च- ' कुतः स्वपिषि ? कस्मान्न परिवेषयसि ? '। स प्रतिवक्ति- " भो लोकाः ! तावता प्रतीक्षध्वं यावता विविधपक्वान्नादिभृतमठिकां स्वप्नदर्शनवत् संप्रत्यपि दृष्ट्वा सर्वं भोज्यमानीय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

युष्मान् भोजयामि"। इति तद्वाक्यश्रवणोद्भूतकोपाटोपा लोकास्तन्मौर्ख्यं निन्दन्तः स्वगृहे गताः, कष्टेन च पाश्चात्यप्रहरे भुक्ताः। एवं धीमद्भिः स्वप्नोपलब्धमात्रेऽर्थे न प्रवर्तितव्यम् ॥

## तृतीया कथा। (३).

माया क्वापि न कर्तव्या, सुधिया स्वहितैषिणा। साऽनर्थाय कृता कन्या–ऽर्थिके भरटके यथा ॥ १ ॥

गङ्गातीरे भीमपुरं नाम पुरम्, तदुपरिष्टात् सुवर्णपुरमस्ति। तत्र सुलोचनः श्रेष्ठी वसति अत्यन्तधनी भौतिकभक्तश्च, तस्य पद्मिनी भार्या। तयोः सुखमनुभवतोः सप्तसुतोपरि बहु प्रार्थ्यमानैका रुक्मिणी नाम कन्या जाता। सा क्रमेण वर्धमाना चतुःषष्टिस्त्रीकलाकुशला सर्वलक्षणोपेता पित्रादीनामत्यन्तं वल्लभाऽभूत्। अथ च भीमपुरात् परस्मिन् भागे योजनान्तरिता भौतिकमठी समस्ति। तस्यां दमनको नाम जटी कौटिल्यपात्रं बहुच्छात्रपरिवृतो वसति किञ्चिद् अतीतादिनिमित्तभाषको लोकमान्यश्च। स एकदा सुलोचनश्रेष्ठिना निजगृहे भोजनायाऽऽकारितो महारसवतीं भोक्तुमुपविष्टः। तस्याग्रे रुक्मिणी रणन्मणिकङ्कण-नू-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुराद्याभरणभूषिता यौवनोद्भूतरूपातिशया गम्गडत्पट्टकूलपरिधाना सरङ्गनीरङ्गी[1] छादित-शिरा मौक्तिकखचितकञ्चुका, [2]पाणिगृहीतमहार्घ्यतालवृन्तेन वीजयन्ती स्थिता। ततश्च स जटी तां सर्वाङ्गसुन्दराम् आदरान्निरूप्य कामपीडितो विस्मृतभोजनरसश्चिन्तयितुमारब्धो यथा– "मनुष्यमध्ये एवंविधा अपि रूपपात्रस्त्रियो भवन्ति यदि तदा स्वर्गे किमस्ति ?। तपस इदमेव मुख्यं फलम्। यतः—

"त्वं प्रिया चेच्चकोराक्षि !, स्वर्गलोकसुखेन किम् ?। त्वं प्रिया यदि न स्या[3] मे, स्वर्गलोकसुखेन किम् ? ॥१॥"

हरि-हर-चन्द्र-सूर्यादीनां यथा सस्त्रीकाणामपि देवत्वं, यथा च वसिष्ठ-गौतमादीनां स-जायानामपि ऋषित्वं न विरुद्धं, तथा ममाऽप्यनया सह ऋषित्वमस्तु। मार्गिता त्वियं व्यवहारिणा सर्वथा न दास्यते, गृहीता तु विलोक्यते एव, अतो मायैव श्रेयसी; [4]तां विना क्वापि कार्यसिद्धिर्न भवति, इति [4]तां कर्तुं प्रवृत्तः। निःश्वस्य तद्ग्रहणध्यानलीनस्य भोज-

१ नीरङ्गी–मुखाच्छादनं वस्त्रम्। २ हस्तगृहीतमहामूल्यव्यजनेन। ३ स्याः– भवेः। ४ मायाम्–कपटम्।

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

नादि विस्मृतं, शून्यचित्त इव स्थितः । श्रेष्ठिना पृष्टम्– ‘ कुतोऽकस्माद् भवद्भिरार्तध्यानैरिव न भुज्यते ?’। स मायया निःश्वस्य वक्ति– “ भोः श्रेष्ठिन् ! किं भुज्यते ? यस्य यजमानस्य गृहे ईदृशी कुलक्षयकारिणी कुलक्षणा कन्याऽस्ति । तेन संप्रत्येतस्याः कुलक्षणदर्शनेन मम भोजनं विषप्रायं जातं, जानामि संप्रत्येवोत्थाय यामि ”। ततः श्रेष्ठिनोक्तम्– “ गुरो ! अस्यां जातायामस्माकं कुलं सर्वप्रकारैर्वृद्धिं प्राप्तं, भवद्भिर्ज्ञानिभिस्तु एवं विरुद्धं कथं कथ्यते ? ” । पुनः स वक्ति– “ तावत्तैव तव कुलवृद्धिर्यावता पाणिग्रहणं न भविष्यति, तदनु च तव कुलस्य श्वशुरकुलस्य च क्षयकरी भविष्यति ”। ततः श्रेष्ठी मूढचित्तः पुराऽपि तद्वचनप्रत्ययाद् भयभ्रान्तो वक्ति– ‘ अत्र भवन्त एव सर्वज्ञा अस्मत्कुलगुरव उचितोपदेशं ददतु किं कर्तव्यम् इति ’। ततः स वक्ति– ‘ मम तपोधनस्य ब्रह्मचारिणोऽनया वार्तयापि किं कार्यम् ?’। ततः श्रेष्ठिनाऽत्यादरेण पादयोर्लगित्वा पृष्टः स वक्ति– ‘ मया कथयिष्यते कोऽप्युपायः, परं भवद्भिर्न करिष्यते ’। श्रेष्ठिनोक्तम्– ‘ किमेवं कथ्यते ?, भवतां सदापि हितानां वचनं कथं न प्रमाणीकरिष्यते ?’। इत्यादि दृढं तर्जयित्वा जौतिकेन प्रोक्तम्– “ श्रेष्ठिन् ! तर्हि शृणूपायम्–



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सालङ्कारां चन्दन-कर्पूरादिचर्चिताङ्गीं [1]सुवसनामेनां काष्ठमञ्जूषामध्ये क्षिप्त्वा गङ्गामध्ये निवाह्यते सा कृष्णचतुर्दशीदिने पाश्चात्यरात्रौ, गृहे च होमः कार्यते, एवं च कृते परगृहे एवाऽनर्थदा भविष्यति, न भवत्कुले"। तद्दिनोपरि सर्वा सामग्रीं कारयित्वा स जटी स्वमठ्यामागत्य शिष्याणामग्रे वक्ति– "भोः शिष्याः! कृष्णचतुर्दशीदिने मम मन्त्रसाधनाऽस्ति, तदर्थं मद्भक्तिसंतुष्टा गङ्गादेवी मह्यमुपहारभूतां मञ्जूषां प्रातः सूर्योदयवेलायां दास्यति; अतो युष्माभिः सावधानीभूय गङ्गाप्रवाहमध्याद् आगच्छन्ती [2]साऽऽकर्षणीया, [3]समुद्रैव च मठीमध्ये क्षेप्या"। इत्यादिशिक्षां दत्त्वा स तद्दिने रात्रौ होमशान्तिकार्थं श्रेष्ठिगृहे गतः। शिष्या नदीतटे स्थिताः। ततः [4]ससप्तपुत्रेण श्रेष्ठिना भृशं शोकाकुलेन साहसमवलम्ब्य तथा सर्वं गुरूक्तं कृतम्। ततः सा मञ्जूषा श्रेष्ठिना पाश्चात्यरात्रौ गङ्गामध्ये क्षिप्ता। श्रेष्ठी सकुटुम्बो गृहे गत्वा शोकादि कृतवान्। ततः सा मञ्जूषा प्रभातोदयवेलायां भीमपुरासन्नागता, तन्नगरस्वामिनः पुण्यसारनृपस्य सेवकैर्दन्तधावनार्थं [5]गङ्गायां गतैर्दृष्टा, आनीता च नृपाग्रे। यावता राजा द्वारमुद्-

१ सुन्दरवस्त्राम्। २ मञ्जूषा। ३ मुद्रासहितैव– मुद्रितैव। ४ सप्तभिः पुत्रैः सहितेन। ५ गङ्गातीरे।

P.P. Ac. Gunratnasuri M.S.                    Jun Gun Aaradhak Trust

घाटय पश्यति तावता तादृशीं कन्यां दृष्ट्वा भृशं विस्मितो मन्त्रिणं पृच्छति– ' भो मन्त्रिन् ! किमिदम् ?'। ततो मन्त्रिणा सा कन्या पृष्टा–'का त्वं ? कस्य सुता ? कथं चाऽत्रायाता ?'। सा लज्जयाऽवाङ्मुखी[1] वक्ति– 'अहं सुवर्णपुरवासिसुलोचनश्रेष्ठिनोऽभीष्टा पुत्री कुलगुरुदमनकजटिना सह किमपि [2]मन्त्रयित्वा पित्राऽत्र क्षिप्त्वा वाहिता, अपरं किमपि न जाने'। ततो मन्त्रिणा बुद्ध्या तत्स्वरूपं सर्वं सम्यग् ज्ञात्वा राज्ञो विज्ञप्तम्। राज्ञा तां कन्यां लात्वा मञ्जूषायां मर्कटिका[3] क्षेपिता। ततस्तथैव मुद्रां दत्त्वा मञ्जूषा गङ्गामध्ये राजपुरुषैर्वाहिता, राजपुरुषाश्च प्रच्छन्नीभूय[4] पृष्ठे लग्नाः। ततस्तदीयशिष्यैः प्राग्दत्तसङ्केतैर्मञ्जूषाऽऽकर्षिता, समुद्रैव च मठीमध्ये क्षिप्ता। ततः सन्ध्यायां प्रकृष्टप्रमोदमेदुराङ्गस्तस्याः संगमम् इच्छन् जटी पवित्रीभूय शुचिवस्त्राद्यलङ्कृतः स्वशिष्याणां संकेतयति– " भोः ! अहमद्य रात्रौ मन्त्रसाधनाय मठीमध्ये स्थास्यामि, तत्र च भूयांसो विघ्ना भविष्यन्ति, अतो भवद्भिर्मठीतो दूरे स्थित्वा सावधानीभूय स्थेयं, मठीद्वारं तु नोद्घाटनीयमेव " इत्यादि। ततः स स्वयं भोगार्थी मध्ये प्रविश्य यावता

१ नतमुखी–अधोमुखी। २ विचारयित्वा। ३ वानरी। ४ गुप्तीभूय।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मञ्जूषाद्वारमुद्घाटयति तावताऽतिबुभुक्षया पीडिता नियन्त्रणारुष्टा मर्कटी तं भौतिकं कर्ण-नासिकादिषु विलूरयामास। ततः स मध्यस्थो भौतिकः पूत्करोति, शिष्यानाकारयति, तथापि शिष्या विनीताः प्राग्वारिता नायान्ति। ततो महता कष्टेन तेन स्वयमेव द्वारमुद्घाट्य निर्गतम्। ततो राजपुरुषैर्बद्ध्वा स राज्ञोऽग्रे नीतो देशाद् बहिष्कृतश्च। सा च कन्या सर्वगुणमयी राज्ञोऽग्रमहिषी बभूव, तस्याः प्रभावेण राज्ञो राज्यवृद्धिः। पश्चात् पितुर्मिलिता। सर्व-कुटुम्बस्यानन्दः॥

## चतुर्थी कथा। (४)

विना गुरूपदेशं यो, यथादृष्टि प्रवर्तते। स एव हसनीयः स्याद्, जटिनो मूर्खशिष्यवत्॥ १॥

वर्धमानपुरे पुरे श्रीभटो भरटकः, तस्य धीजडो नाम शिष्योऽतिमूर्खः। स एकदा नगर-मध्ये भिक्षार्थं गतः। तत्र च कस्यचित् सूत्रधारस्य गृहे सूत्रधारेणाऽतिवक्रं वंशं तैलाभ्यङ्ग-पूर्वं वह्नितापनेन सरलीक्रियमाणं ददर्श। तं तथा कुर्वन्तं दृष्ट्वा स धीजडः सूत्रधारं पप्रच्छ–'भ्रातः किमिदं क्रियमाणमस्ति?।' तेनोक्तम्–'वक्रवंशस्य सरलत्वम्'। ततः स चिन्तयति–'भातवि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कारेण वक्रीभूतस्य मद्गुरोरपि इदमेवौषधं भवतु, सर्वत्राऽप्ययमेव सरलीकरणे प्रकारः'। ततः स धीजको मठिकां गत्वा स्वगुरुं तैलाभ्यङ्गपूर्वकं वह्नावत्यर्थं तापयति स्म, तापदूनश्च वराको गुरुः पूत्करोति स्म। तदाक्रन्दं श्रुत्वा भूयांल्लोको मिलितस्तं वारयति स्म–"अरे मूर्ख! मैवं स्वगुरुं विडम्बय, एवं क्रियमाणे हि वृद्धस्याऽस्य प्राणा एव यास्यन्ति"। एवं लोकाक्रोशान् श्रुत्वा स प्रतिवक्ति यथा– "भवन्त एव मूर्खाः, भवतां च जनका मूर्खाः, अहं तु स्वगुरोर्वक्रस्य सरलत्वं कुर्वाणोऽस्मि; भवतां केयं परितप्तिः?"। ततो लोको बह्वाक्रोशयन् बलात्कारेण तं मोचयामास। एवं बुद्धिमद्भिर्न कार्यम् ॥

## पञ्चमी कथा। (५)

तपो-जाप-क्रिया-पाठ-गुणनानि विनाऽप्यहो। लभन्ते केऽपि भोज्यादि, यथेष्टं जटिशिष्यवत् ॥ १ ॥

गोदकग्रामे भरटको नाम भरटकाचार्यः। तस्य भूयांसः शिष्याः सन्ति, परं ते न किमपि पठन्ति गुणयन्ति क्रियां वा कुर्वन्ति; किन्तु निद्रा-वार्ता-विकथादिपरास्तिष्ठन्ति। तथापि तत्रत्यो भृशं मूर्खो लोकस्तद्गुणरञ्जितोऽहमहमिकापूर्वम् एतेषां भोजन-वस्त्रादि ददाति बह्वादरेण। तेन



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रतिदिनं यथेच्छाहार-विहारादिभिस्ते शिष्याः पुष्टवपुषो महिषप्राया जाताः । तत एकदा तद्ग्रामवासिना ग्राम्यकविना ब्राह्मणेन ग्राममध्ये बहुयाचनेऽपि किमप्यलभमानेन तान् दृष्ट्वा विस्मयापन्नेन ते साश्चर्यमुपश्लोकिता यथा—

" भरटक ! तव चट्टा लंबपुट्ठा समुट्ठा, न पठति न गुणंते नेव कव्वं कुणंते ।
वयमपि च पठामो किंपि कव्वं कुणामो, तदपि भुख मरामो कर्मणां कोऽत्र दोषः ? ॥ १ ॥ "

इत्यादि लोकानां पुरस्तात् सर्वत्र स कथयति स्म । लोकानामपि चाश्चर्यम् ॥

## षष्ठी कथा [ ६ ]

आत्मकष्टं प्रकाशन्तो, येषां तेषां यथा तथा । दोरिकाकर्षकजटी, यथा दुःखी पुराऽभवत् ॥ १ ॥

विकटग्रामे सोमको भरटको वसति । स चैकदा वर्षासत्तो स्वमाठकां तृणैश्छादयित्वा उपरिष्टाद् दोरिकां बध्नानोऽधोमस्तकेन पतितो, भृशं पीडितश्च; वपुषि व्रणान्यपि जातानि। ततस्तस्य पीडितस्य भाषणाय लोक आगच्छति पृच्छति च—" भोः ! किं जातम् ? कथं च पीडितः ? "। स मूर्ख उत्थाय तथा कृत्वा लोकानां दर्शयति—' एवं पतितः पीडितश्च '। एवं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रतिजनं तथा कुर्वाणस्तथा पीडितो यथा उत्थातुमपि न शक्नोति । पुनर्लोकपृच्छायां कथयति–' भवतां जनको दर्शयिष्यति '। अतः परं लोकस्तं हसन् स्वस्थाने जगाम ॥

## सप्तमी कथा. [ ७ ]

मूर्खशिष्यो न कर्तव्यो, गुरुणा सुखमिच्छता । विडम्बयति सोऽत्यन्तं, यथा वटकभक्षकः ॥ १ ॥

कटेरकग्रामे लुंठको जटी, तस्य कुंठको नाम शिष्योऽतिमूर्खो भक्षकश्चाऽस्ति । स एकदा यजमानगृहे कस्मिन्नपि उत्सवे जायमाने द्वात्रिंशद् वटकानि भिक्षायां लब्धवान् । ततः स मठिकामागच्छन् अन्तराले बुभुक्षापीडितश्चिन्तयति–" इयतां वटकानां मध्ये गुरुर्मह्यं स्वार्धं दास्यति, तर्हि संप्रत्येवाऽहम् आत्मीयमर्धं भक्षयामि " इति षोडश वटकानि भक्षितानि । पुनर्विचारयति–" इयतामप्यर्धं दास्यति गुरुः, इति स्वार्धमष्टरूपं भक्षयामि " इति पुनरष्टौ भक्षितवान् । ततस्तावद् वटकाष्टकं लात्वा स्वगुरोः पार्श्वे शिष्यो मुमोच । गुरुणोक्तम्–" भोः ! किमिदं वटकाष्टकमेव ?, त्वया वा किमपि भुक्तम् ?" । स वक्ति–'द्वात्रिंशद्वटकान्यत्र दत्तानि यजमानेन, परं मया भक्षितानि '। गुरुणोक्तम्–'कथम् ?' । ततः स शिष्यः शेषमध्यर्धं गुरोः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पश्यत एव स्वमुखे क्षिप्त्वा कथयति–' मया एवं भक्षितानि! '। गुरुस्तु एवमेव बुभुक्षित एव स्थितः। लोकानां तज्ज्ञाने विस्मयो जातः॥

## अष्टमी कथा (८)

आत्तव्रताः स्वसंकल्पात्, प्रवर्तन्ते यथा तथा। विडम्बं यान्ति ते प्रान्ते, इक्षुग्राहकभिक्षुवत्॥ १॥

मल्हानकग्रामे निस्सङ्गो नाम जटी अन्ते वयसि वर्तमानो धर्मार्थी सन् न कस्यापि सत्क-मदत्तं गृह्णाति। स एकदा पुरबहिर्भ्रमन् क्वापि इक्षुवाटके सरसेक्षुदण्डान् दृष्ट्वा जिघृक्षुरनु-ज्ञापनार्थं वाटिकाम् एवमवादीत्–' भो वाटिके वाटिके! गृह्णामि त्रि-चतुरान् इक्षुदण्डान् '। पुनः स स्वयमेवोत्तरयति–' भो! गृहाण पञ्च-षान् '। एवं स्वयमेवाऽनुमतिं लात्वा पञ्चषा-निक्षुदण्डान् गृहीत्वा याति। एवं सर्वदा क्रियमाणे धनिकेन ज्ञातम्–" को नाम पापिष्ठो मदीयवाटिकाया इक्षुदण्डान् गृहीत्वा याति, तदद्य प्रच्छन्नीभूय विलोकयामि "। इति विचिन्त्य प्रच्छन्नीभूय स्थितः। ततस्तं तथा कुर्वन्तं धनिकः प्रकटीभूय हक्कयामास। ततो जटी

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

वक्ति—“भो ! मा कुपः मा कुपः, अहं सर्वदापि मुत्कलाप्यैव इक्षुदण्डान् गृहीतवान् ”। धनिकेनोक्तम्—‘कथम् ?’। तेन स प्रकारः कथितः । ततो रोषाध्मातेन तेन जटिनं दृढं बद्ध्वा कूपसमीपे च नीत्वा प्रोक्तम्—‘ कूप ! कथय कथय, आबुकाद् दापयामि ते त्रिचतुरा डब्बिकाः’ । ‘दापय पञ्चषा ’ इत्युक्त्वा बहु विडम्ब्य वराको मुक्तः, शिक्षितश्च—‘ अतः परम् एवं कदापि न कार्यम् ’ इति ॥



# नवमी कथा [९]

स्वं प्रच्छन्नं कृतं कर्म, गर्हितं शङ्कया जडः । भाषते स्वयमेवाऽत्र, राजमान्यो जटो यथा ॥ १ ॥

सुप्रजपुरे रिपुमर्दनो नृपोऽभूत् । तत्र च धरटको नाम भरटकोऽतिदरिद्रो वसति । स एकदा लक्ष्मीसमुपार्जनार्थं विदेशे गतः, वाराणस्यां च पुर्यामेकस्मिन् दिने संपूर्णदिनं भोजनार्थं बभ्राम, परं भोजनं क्वापि न प्राप । ततो रात्रौ जातायां बुभुक्षया म्रियमाणः स कस्यापि रजकस्य गृहे जगाम, तत्र श्राद्धप्रकरणे जायमाने गृहस्वामिना भोजनाय निमन्त्रितः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेनाऽनन्यगतिकत्वेन तत्रापि त्रुक्तमाकण्ठम्। पश्चात् कालान्तरेण स स्वपुरे समागात्, दैवानुकूल्याद् राजमान्यो राज्ञोऽतिप्रसादपात्रं स पुरोहितो बभूव। अन्यदा तत्र पुरे विदेशादेकं कलाविन्नटपेटकं समागात्, तेन राज्ञोऽग्रे स्वकीया कला दर्शिता, अतिरञ्जितेन राज्ञा तस्य बहु दानं ददे। ततो राजमान्यत्वेन द्वितीयदिने तेन नटपेटकेन रात्रौ पुरोहितगृहे नाटकं मण्डितम्, भूयांसोऽपि लोका अवलोकका मिलिताः। ततस्तेन नटपेटकेन प्रहरद्वयं यावद् नानारूपरसोपेतगीताङ्ग-हाराङ्ग-विक्षेप-हस्तकादिप्रकारैर्नाटकं कृतं, परं तस्याऽतिमूर्खस्य पाषाणप्रायस्य पुरोहितस्य किमप्याश्चर्यं नाऽजायत, अतः स किमपि न दत्ते। ततः सूत्रधारो विलक्षश्चिन्तयति– "नूनमयं महामूर्खः सर्वथाऽयोग्यः संभाव्यते सरसकथारसानाम्। ततः कमप्यधीश्वरसत्कं प्रबन्धं मुग्धजनरञ्जनोचितं कौतुककारिणं प्रस्तावयामि, यतस्तच्छ्रवणात् संतुष्टो दास्यति"। इति विमृश्य प्रस्तावयति, यथा—

"कहिसु भरडक जं जं कियउ"

P.P. Ac. Gunratnasuri M.S.                                                                 Jun Gun Aaradhak Trust

इदं श्रुत्वा स भरटकः स्वयं शङ्कितः– "निश्चितमेष सूत्रधारो मदीयं वाराणस्यां रजकगृहे भोजनं जानाति, तद् लोकमध्ये मा प्रकाशयतु" इति हेतोस्तेन सुवर्णाभरण-पट्टकूलादि बहु दानं दत्तम्। पुनर्लब्धोपायेन सूत्रधारेण तदेव पदं द्वितीयवारं प्रस्तावितम्, भरटकेन पुनर्दानं दत्तम्। एवं तृतीयवेलायाम्। चतुर्थवेलायां कुपितेन भरटकेन स्वयमेव स्वकृतं दुष्कृतं प्रकटीकर्तुं प्रोक्तम्, यथा– "भोः सूत्रधार! त्वं पुनः पुनः किं कथयसि 'कहि सु भरडक जं जं कियउ' इत्यादि ?। याहि, कथय। 'मया वाराणस्यां बुभुक्षया म्रियमाणेन रजकगृहे भुक्तम्' एतदेव कथयसि ?। कथय तर्हि, अतः परं किमपि न ददामि"। तच्छ्रुत्वा लोकः सर्वो विस्मितः। नाटकं विसर्जितम् ॥



## दशमी कथा (१०).

व्यवहारमजानानो, नरः शोभां बिभर्ति नो। लोकोपहासमाप्नोति, [1]शण्डदोग्धा यथा जटी ॥ १ ॥

सुस्थितग्रामे बहवो भरटका वसन्ति। एकदा तैर्भिक्षायां गतैः कस्यापि कौटुम्बिकस्य

१ वृषदोग्धा।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गृहे पायसं घृत-शर्करोपेतं लब्धम्। तैस्तद् भुक्तं, जड्डायां लग्नम्। तदुत्पत्तिर्जरटकैर्यजमानेभ्यः पृष्टा। तैः स प्रकारः प्रोक्तः। ततो द्रव्येण तैरेका गौः क्रीता नवप्रसूता दुर्बला च। ततोऽन्यैर्जरटकैः प्रोक्तम्—" भो मूर्खा! भवद्भिरेषा दुर्बला गौः किमर्थं क्रीता? एषा च लघुस्तनी स्वल्पमेव दुग्धं दास्यति, अतोऽस्याः परावर्तनाद् अपरा पुष्टा स्थूलस्तनी गौरानीयताम्"। ततस्तां लात्वा पञ्चापि जटिनो मिलित्वा गोकुले गताः। ततो गोकुलपतेरुक्तम्—'इमां लात्वाऽस्माकमपरा गौर्दीयताम्'। तेनोक्तम्— 'भो! भवतां या रोचते तां गृह्णन्तु तासु मध्ये'। ततस्तैर्महामूर्खैः सर्वतो विलोक्य दुर्बलत्वेन सर्वा गास्त्यक्त्वा एकः पुष्टः शण्डो गोबुद्ध्या जगृहे!। ततस्तं स्वगृहे नीत्वा यावता सर्वेऽपि जटिनो दोहाय प्रवृत्तास्तावता विन्दुरपि न निर्गतः। ततस्तेऽत्यादरेण दोहाय प्रवृत्ताः, तदा गाढपीडनेन शण्डः पादप्रहारं दत्त्वोत्पतितः। ततः सर्वेऽपि विलक्षीभूताश्चिन्तयन्ति—'कुतो दुग्धं न निर्गच्छति?'। तत एकेन वृद्धजटिना महाबुद्धिमता प्रोक्तम्—'भो जरटका! यूयं कारणं न जानीथ'। ततोऽपरैः

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

'जोः ! किं कारणम् ?' इति पादयोर्लगित्वोक्तम् । ततस्तेनोक्तम्–'एतस्या गोः स्तने छिद्रं नास्ति, तेन दुग्धं न निस्सरति'। अपरैरुक्तम्–'सत्यं रे सत्यम्'। तत एकस्य जटिनो जटाभिरग्रेतनपादयोर्बद्धः शण्ढो, द्वितीयस्य तु जटाभिः पाश्चात्यपादयोः । एवं कृत्वा केनचिज्जटिना [1]स्यूतकेन वृषणे छिद्रं कर्तुं प्रारब्धम् । तावता [2]स उत्पत्य फालां दत्त्वा पलायितः, जटिनोर्जटास्त्रुटिताः। लोका बुम्बापरा मिलिता हसन्तस्तेषामाक्रोशान् ददुः। ततस्ते भरटका 'अस्माकं गौर्गच्छति गच्छति' इत्यालपन्तः पृष्ठौ लग्नाः, एवं तेषां पश्यतामेव स शण्ढो वने गतः ।

ततः सर्वेऽपि जटिनो मिलित्वा मन्त्रयन्ति, यथा–'इयं गौर्न भव्या, पुनर्नवीना गृह्यते'। इति पञ्चशतं द्रम्मान् लात्वा सार्थेन सहैको जौतिको विशिष्टधेनुग्रहणाय चलितो ग्रामान्तरं प्रति। रात्रौ अन्तराले क्वापि देवकुले पञ्चषैः सार्थिकैः साकं शयितः । मध्यरात्रे-

१ सूच्या । २ शण्ढः ।

Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽपरेषु निद्रया घूर्णमानेषु तस्मिंश्च भरटके जाग्रति चौरा आगताः । तैस्तं जीर्णशटितवाससं 'न्नूतिखरण्टितं च दृष्ट्वा प्रोक्तम्–' भोः ! किमनेन मुषितेन ?, अयं कोऽपि रङ्कः शयितोऽस्ति, अतः स्थानान्तरे गम्यते '। एवं तदालापं श्रुत्वा जटी वक्ति–' भवन्तो रङ्काः, भवतां च जनको रङ्कः । अहं धनी, मम पञ्चशतं द्रम्माणामस्ति '। इत्युक्त्वा ग्रन्थिं वादयित्वा दर्शयति । पुनर्जल्पति–' यदि च न मन्यध्वे तदैतान् सार्थिकान् पृच्छत '। ततश्चौरैः पश्चाद्वलित्वा पूर्वं स लुण्टितः, पश्चात् सर्वेऽपि लुण्टिताः । ततस्तैराकृष्टो नौतिकः शिरः कण्डुयित्वा स्वगृहे आगतः । एवं न कार्यम् ॥

## एकादशी कथा । [ ११ ]

स्वयं मूर्खालसो यश्च, परवागविचारकः । स दुःखी स्याद् यथा शीत–पीडितो जटिलः पुरा ॥ १ ॥

कुरूग्रामे धरणो नाम जरटकोऽभूद् मूर्खोऽत्यलसशिष्ययुतः । एकदा शीततौं स्फीते

---

१ भस्मावलिप्तम् ।

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

शीते पतति मध्यरात्रे स भौतिको लघुनीत्यर्थं मठ्या बहिर्निर्गतः । तां कृत्वा स भृशमलसत्वेन तत्रैव स्रस्तरभ्रान्त्या पपात निद्रया घूर्णमानः । पाश्चात्यप्रहरे स शीतेन भृशं पीडितः कोकूयते, शिष्यस्य च कथयति–' भोः शिष्य ! किमहं स्रस्तरे मठीमध्येऽस्मि बहिर्वा ?'। तच्छ्रुत्वा सोऽपि तादृगेवाऽलसः शयित एव स्वहस्तेन गुरोः स्रस्तरं विलोकयति । तत्र शयितस्य शुनः पुच्छं तस्य करे लग्नम् । ततः शिष्यो वक्ति–' भो गुरो ! तव पुच्छमस्ति नवा?'। सोऽपि तच्छ्रुत्वा स्वकच्छोटिकां करेण संभाल्य वक्ति–' भोः ! अस्ति मम पुच्छम् '। ततः शिष्येणोक्तम्–' तर्हि मठीमध्ये स्रस्तरे त्वमसि '। ततः स तद्वचनप्रत्ययेन स्वमौढ्येन च तत्र पतित एव शीतेन पीडितो मृत इव जातः । प्रातर्लोको मिलितः । तं तथा पतितं दृष्ट्वा लोकः पृच्छति–' भोः ! किं जातम् ? '। शिष्यो वक्ति–' नाऽहं जाने '। पश्चात् सूर्यकरस्पृष्टः प्राप्तचैतन्यो भौतिक उत्थापितः । लोकानां तु कौतुकमभूत् ॥



## द्वादशी कथा । ( १२ )

औषधाढ्यो न कार्यज्ञो, मूर्खं पश्येद् यथा जठी । वैद्यातिविषदानेऽपि, विषेणाऽमारयद् गुरुम् ॥ १ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कोलकग्रामे वृद्धो जूटको जट्यस्ति । स एकदा ज्वरविकारेण अत्यर्थं पीडितः । सन्निपाताधिक्ये जाते तदीयशिष्येण वैद्यगृहे गत्वा औषधं पृष्टम् । तेन ' अतिविषम् ' उक्त्वा ' अल्पं देयम् ' इत्युक्तम् । शिष्येण मार्गे आगच्छता चिन्तितम्—" वैद्येनाऽतिविषमुक्तं, मम गुरुस्तु कृशं दुर्बलः, तेन प्रथममतिविषं न सहिष्यते । ततः प्रथमं विषं ददामि तस्य ज्वरे, न त्वतिविषम् " । इति गान्धिकहट्टाद् विषमानीय घोलयित्वा स्वगुरोर्दत्तम् । तेन गुरुः शीघ्रं ममार । लोकैः शिष्यो निन्दितः । एवं न कार्यम् ॥

## त्रयोदशी कथा । [ १३ ]

विचार्य वेलां प्रष्टव्यः, संदेहो न यथा तथा । दृष्टान्तोऽत्र स्वर्गधेनु—पुच्छलग्नजटिव्रजः ॥ १ ॥
सर्वेऽपि लोभिनो यत्र, मन्दबुद्धिजनाश्रिताः । तत्र नैवाऽनुगैर्भाव्यं, तां श्रुत्वा मौदकीं कथाम् ॥ २ ॥

सुघोषग्रामे भूयांसो जटिनो वसन्ति । तेषां मध्ये एकः सर्वपशुनामा जट्यस्ति । तेनैका वाटिका कृता, सा कियद्भिर्वर्षैर्दिव्यद्रुम-पुष्प-फलोपचिता स्वर्वाटिकाकल्पाऽजनि । तस्यां रात्रौ कामधेनुरागत्य चरति, प्रभातप्रायायां रात्रौ पुनः स्वर्गे उत्पत्य याति । एवं प्रत्यहं तया वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नाश्यमानायां वाटिकायां धनिकजटिना रात्रौ सावधानीभूय स्थितम्, तावता गौरागता। तां संपूर्णां रात्रिं यावच्चरित्वा पाश्चात्यरात्रौ स्वर्गच्छन्तीं दृष्ट्वा जटी पुच्छे विलग्नः स्वर्गे गतः। तत्र सरसमोदकादि भक्षितं, प्रीतश्च तद्रसेन। पुनरन्यदिने तत्रत्यमेकं सिंहकेसरं मोदकं लात्वा तस्याः पुच्छे विलग्य स्ववाटिकायामायातः। प्रातः स्वगृहे गतः। अन्ये जटिनो मिलिताः। तैः पृष्टम्– 'त्वं क्व गतोऽभूः?'। स वक्ति–"अहं स्वर्गे। तत्रेन्द्र-चन्द्रे-श्वर-विनायकादयो दृष्टाः; ईदृशाश्च मोदका भक्षिताः"। इत्युक्त्वा तान् दर्शयति। तैर्जौतिकैस्तस्य खण्डं खण्डं भक्षितं, जिह्वायां लग्नम्। तैरुक्तम्–' भोः! अस्मानपि स्वर्गे नय, यतो वयमपि स्वर्गं पश्यामः, तत्सत्कान् मोदकांश्च भक्षयामः'। ततस्तेनोक्तम्–"सर्वेऽपि मया सह वाटिका-मध्ये आगच्छन्तु, प्रच्छन्नाश्च तिष्ठन्तु। यदा गौश्चरित्वा आकाशे उत्पतति तदाऽहं तस्याः पुच्छे लगिष्यामि। मम पादेऽन्येन, तस्याऽप्यपरेण लगनीयम्। एवं सर्वैरपि श्रेणिः कार्या"। एवं कृत्वा सर्वेऽप्युत्पतिताः। अर्धमार्गगमने एकनाऽधःस्थेन संदेहः पृष्टः–' भोः! स्वर्गे कियन्माना



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मोदकाः सन्ति ?'। ततो मुख्यजरटकेन भृशं मूर्खेण गोः पुच्छं मुक्त्वा हस्ताभ्यां दर्शितम्–'भो! इयन्मानास्ते सन्ति' इति। ततः सर्वेऽपि भूमौ पतिताः। एवमनवसरे संदेहो न प्रष्टव्यः॥

## चतुर्दशी कथा। [ १४ ]

वाक्यतत्त्वमजानानो, यथादृष्टप्रवर्तकः। वैद्यपिट्टितपुत्रेक्षि– जडवद् राजते नहि ॥ १ ॥

कोरंटकग्रामे बधिरो वृद्धो जटी वसति। तस्य शिष्यो [१]बाधिर्यदूनस्तद्व्यपगमोपायान् मार्गयति। एकदा भिक्षायै स कस्यचिद् वैद्यस्य गृहे जगाम। पूर्वमपि च तस्य वैद्यस्य गृहेऽष्टवर्षीयो बालः पित्रा लेखशालागमनाय शिष्यमाणोऽस्ति। पित्रा बहु वादितोऽपि रोषात् स [२]नोत्तरयति। ततः पित्रोक्तम्– 'भोः! किं न शृणोषि ?'। तथापि न वक्ति। ततो भृशं रुष्टेन पित्रा स्तम्भे दृढं बद्ध्वा चपेटया पिट्टितो वक्ति– 'तात! शृणोमि शृणोमि'। इति द्वारस्थो भौतिकः श्रुत्वा विमृष्टवान्– 'बाधिर्यव्यपगमस्य इदमेवौषधं मम गुरोरपि करोमि'।

---

१ स्वगुरोर्बधिरत्वेन दूनः। २ उत्तरं न ददाति।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो मठ्यां गत्वा तथा कुर्वतः शिष्याद् लोकैर्बलात्कारेण गुरुर्मोचितः, प्रोक्तं च– ' अरे मूर्ख कुशिष्य ! कुतोऽतिजरसं स्वगुरुं पिट्टयसि ? '। ततः स वक्ति– ' यूयं मूर्खाः किं जानीथ ?। अहं स्वगुरोर्वाधिर्यव्यपगमौषधं कुर्वाणोऽस्मि, भवतां का नाम तप्तिः ? ' । लोकैरुक्तम्– ' अरे मूर्ख ! इदमौषधं तव केनोक्तम् ?'। तेनोक्तम्–' मयाऽद्यैव वैद्यगृहगतेन वैद्येन स्वपुत्रस्य क्रियमाणं दृष्टं, तस्य बालकस्य तत्कालमेव गुणोऽभूत् '। ततो लोकैर्विशेषत आक्रोशितः । एवं बुद्धिमता न कार्यम् ॥





## पञ्चदशी कथा । ( १५ )

मूर्खेण विहितं कार्य–मुपहासाय जायते । गुरुभार्याऽऽनायकस्य, शिष्यस्यात्र निदर्शनम् ॥ १ ॥



सूर्यपुरे पुरे मोकलिर्नाम जटी । तस्य चेटकः शिष्योऽस्ति नृशं मूर्खशेखरः । स एकदा गुरुणा भार्यानयनार्थं श्वशुरगृहे प्रहितः । शिक्षा च दत्ता, यथा—" भोः ! त्वया तत्र गतेन गम्भीरेण भाव्यम्, पञ्चोच्चानि पञ्च नीचानि वाच्यानि' इत्यादि । ततः स गुरुश्वशुरगृहे गत्वा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्संबन्धिभिः कुशलवार्तां पृष्टः सन् गुरोः शिक्षां हृदये निधाय प्रथममुच्चं प्रोक्तं, यथा 'पर्वतः पर्वत' इति। ततो नीचं प्रोक्तं, यथा–'ढोलिर्डोलिः[1]' इति। वक्रं यथा–'दात्रं दात्रम्' इति। [2]प्राध्वरं यथा–'वंशो वंश' इति। ततो गृहमध्ये गत्वोच्चं विलोक्य कोष्ठिकाया उपरि चटितः, तत्र नीचं गर्तां विलोक्य तस्यां पतितः। तदा गृहवासिभिस्तत्त्वं पृष्टोऽपि न वक्ति। ततस्तैरनुमानेन विचारितं, यथा– "पुत्रीपतिर्जरटको वंशं छेत्तुं क्वापि वने पर्वते चटितो दात्रेण तं[3] छिन्दानो विस्खलितपादो गर्तायां पपात, ततो मृतो भविष्यति। अयं स्पष्टं न वक्ति गम्भीरत्वेन"। तावता स मौतिकशिष्यः किञ्चिद् उषित्वा विच्छायवदनीभूतः[4]। तं तथाविधं दृष्ट्वा सर्वैरपि तत्रत्यैः सहसा पूत्चक्रे, यथा– 'हा दैव! त्वया पापिष्ठेन किं कृतम्?, इयं वराकी भरटिका रण्डिता'। ततः सोऽपि मूर्खस्तेषां पूत्कारं श्रुत्वा रुरोद। द्वि-त्रिदिनानन्तरं स एवमेव स्वस्थाने आगतो गुरुणा पृष्टः–'त्नो! भरटिका कस्मान्नाऽऽनीता?'। स पूत्कारपूर्वं वक्ति–'सा

१ भाषायाम्–डोळी। २ सरलम्, भाषायाम्–सीधुं, पाधरुं। ३ वृक्षम्। ४ ग्लानमुखीभूतः।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वराकी रण्डिता ! '। ततो गुरुरपि मुक्तकण्ठं रोदितुं प्रवृत्तः, शिष्योऽपि च। तदा प्रातिवेश्मिकलोका मिलिता रोदनकारणं पप्रच्छुः । भरटको वक्ति—' निश्चितोऽहं, मम वराकी भरटिका रण्डिता ! '। लोका वदन्ति—'अरे मूर्ख ! त्वयि जीवति सा कथं रण्डिता ?'। स वक्ति—' अहं किं जाने ?, अयं मच्छिष्यः संप्रत्येव तस्याः पितृगृहाच्छुद्धिं लात्वा आगतः'। लोकैर्हसद्भिरुक्तम्—' भोः! पत्यौ जीवति स्त्री रण्डा न भवति'। परं स न मन्यते । ततोऽनेकैः शपथैर्दृष्टान्तैश्च बोधितः ॥



## षोडशी कथा । ( १६ )

केचिज्जडधियः कार्ये, पारम्पर्यं न जानते । पात्रपक्षद्वयात् क्षिप्ते, घृततैले तपस्विना ॥ १ ॥

लक्ष्मीपुरे पुरे धक्कटो भट्योऽस्ति । तस्य मोढकः शिष्योऽतिमूर्खः । स एकदा गुरुणा घृततैलानयनाय हट्टे प्रेषितः । तेन तदर्थमेकमेव धूपकडुच्छकं गृहीतम् । ततः कस्यचिद् वणिजो हट्टे मूल्यमर्पयित्वा तस्यैकस्मिन् पक्षे प्रथमं घृतं क्षेपितं, पुनस्तैलं विपर्ययं कृत्वा द्वितीयप-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

के केपितम्। एवं मठ्यामागत्य गुरोर्दर्शितम्, कथितं च–' मया घृत-तैले आनीते स्तः। गुरुणोक्तम्–' क्व ?'। तेन दर्शितम्–' इदं तैलम्'। गुरुणोक्तम्–' घृतं क्व ?' शिष्येण धूपदहनस्य विपर्ययं कृत्वा दर्शितम्–' इदं घृतम्' इति। तावता तैलमपि भूमौ पपात। एवं द्वयमपि त्यक्तम्। एवं न कार्यम्॥

## सप्तदशी कथा। [ १७ ]

बहुनाऽपि विचारेण, न मूर्खस्तत्त्वमीक्षते। यथा शण्डविषाणान्तः-क्षिप्तमौलिर्जटी पुरा॥ १॥

मङ्गग्रामे सुविचारो नाम जटयस्ति। स भिक्षार्थं कस्यचिद् गृहे याति, तस्य च गृहे एकं वृत्तशृङ्गं स्थूलवपुषं शण्ढं पश्यति। ततः प्रतिदिनं विचारयति–' किं मम मस्तकम् एतस्य शृङ्गयोरन्तराले माति नवा ?' इत्यादि। एवं षण्मासी जगाम। ततः स चिन्तयति–"अद्य क्षिपापि शिरः। मम तु विचारयतः षण्मासी गता, एतावद्विचारेण कार्यं कृतं सुकृतं भवति"। एवं विमृश्य शिरः क्षिप्तम्। तावता शण्ढो बन्धनं त्रोटयित्वा पलायितः, पुरमध्ये

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

भरटक-द्वात्रिंशिका ॥१६॥

स्व बभ्राम । जटी तु तदग्रे लम्बमानो विरौति । तावता भूयांसो लोका मिलिताः, तैर्महता कष्टेन मोचितः । ततो लोकैरुक्तम्–' अरे मूर्ख ! त्वम् अविचार्यकार्योऽसि '। स वक्ति–' भवन्तो मूर्खा अविचारितकार्याश्च, मया त्विदं कार्यं षण्मासविचारेण कृतम् '। ततो लोकैराकृष्टम् । एवं बुद्धिमद्भिर्न कार्यम् ॥

આચાર્ય વિજય ભદ્રસૂરી
卐 જ્ઞાનકોશ. 卐

## अष्टादशी कथा । [ १८ ]

न कार्यः केवलोद्घोषः, पदच्छेदमकुर्वता । वैद्यवाक्याद् यथा मूर्खो, जटी गुरुमपीडयत् ॥ १ ॥

सुवालग्रामे टिक्को जटी, तस्यैक उद्घोषकः शिष्योऽभूत् । एकदा तस्य गुरुः श्लेष्मविकारेण भृशं पीडितः । ततः शिष्येण वैद्यपार्श्वे तदौषधं पृष्टम् । वैद्येनोक्तं यथा–' गुड दाडिम सूंठि मिरी ' इति । ततो मार्गे आगच्छन् शिष्य उद्घोषयति पदच्छेदम् अकुर्वाणः । ततो मठ्यासन्नागमने जातं यथा– ' गुडदा डिमसूं ठिमरी ' इति । ततो मठ्यामागत्य प्रथममाद्यं

सप्तदशी अष्टादशी कथा ॥१६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

[1]गुडदा इत्यौषधं कृतम् । ततोऽग्रेतनौषधद्वयार्थस्य पृच्छायै पुनर्वैद्यगृहे गतः शिष्यः , पृष्टं च–'भो वैद्य ! मया त्वदुक्तं गुरुदा इत्यौषधं स्वगुरोः कृतम् । अग्रेतनस्य क्रिमसूं ठिमिरी तस्य कोऽर्थः ? "। ततो वैद्येनोक्तम्–" महामूर्ख ! पापिष्ठ ! किं कृतम् ? । त्वया वराको गुरुर्मुधा मारितः " । पश्चात्तदौषधचतुष्कं व्यक्त्या प्रोच्य अर्पितं च स्वगृहात् ॥

આચાર્ય વિજય મલસૂરી
卐 જ્ઞાનકોશ. 卐

## एकोनविंशतितमी कथा । (१९)

अनभिज्ञे गुरौ तत्त्वं, कथं वीक्षेत [2]शैक्षकः । विद्युतं वीक्ष्य जटिनौ, विवादप्रवणौ यथा ॥ १ ॥

सोहलग्रामे करमन्दो जटी, तस्योभौ शिष्यौ । तौ एकदा निशायां मेघमालाच्छन्ने नभसि विद्युद्द्योतं दृष्ट्वा विवदाते, यथा; एकेनोक्तम्–' भोः ! पश्य पश्य, नभसि [3]प्रदीपनं लग्नम्, तज्ज्वाला एता दृश्यन्ते '। द्वितीयेनोक्तम्–' मा मृषा वद । इयं [4]शकटिकाऽस्ति, अस्या ज्योतिश्चक्रं सर्वं शीतपीडितं तापयदस्ति '। इत्यादिकलहं कृत्वा शिष्याभ्यां गुरुस-

१ गुर्जरभाषायाम्–गडदा मारवा । २ शिष्यः । ३ अग्निः । ४ नक्षत्रविशेषः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मीपे सन्देहः पृष्टः—'भो गुरो! किमिदम्?' इति। गुरुरपि तद् दृष्ट्वाऽजानन् स्वयमेव किञ्चित् कल्पयित्वा वक्ति—"भोः शिष्यौ! नेदं प्रदीपनम्, नैषा च शकटिका ज्वलन्त्यस्ति, किन्तु सूर्यो मुखं कम्पयित्वा विलोकयन्नस्ति—किं सुप्रभातं नवा? इति। यदि प्रभातं भवति तदाऽहमप्युदयं करोमि, नान्यथा!"। इत्युक्त्वा गुरुणा शिष्ययोर्विवादो भग्नः॥

## विंशतितमी कथा। (२०)

अतिघोषेऽपि मूर्खस्य, विस्मरत्येव धारितम्। यथा सांगणसचिव-गुरोर्हि जटिनः पुरा॥ १॥



ऋद्धपुरे सांगणो मन्त्री भृशं भौतिकभक्तोऽस्ति। एकदा तस्य गुरुर्गुग्गुलिनामा जटी देशान्तराद् बहुभिर्वर्षैर्यजमानवन्दापनाय आयात एकं श्लोकमाशीर्वादाय धारयित्वा। यथा—

"स [1]धूर्जटिर्जटाजूटो, जायतां विजयाय च। यत्रैकपलितभ्रान्तिं, करोत्यद्यापि [2]जाह्नवी॥ १॥"

परन्तु मन्त्रिपुरस्तादागते जटिनि क्षोभवशात् श्लोको विस्मृतः। पश्चादुच्चैर्नीचैर्वि-

१ शङ्करः। २ गङ्गा।



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

लोक्य चेल्लकपार्श्वे पृष्टम्–' भोः ! कथय, कः श्लोकस्यादिः ? ' । स वक्ति–' टकारा बहवः सन्ति श्लोके ' । गुरुर्वक्ति–" स्मृतः, यथा–

" [1]फुट्ट फुट्ट फुटा फुटा फौटा, जायतां [2]वइजला इव "।

इत्यर्धोक्ते स्थित्वा पश्चात्तत्रासक्तौ बलीवर्द–महिषीदर्शनेऽपरार्धे कल्पितं यथा–

" यत्रैक बलद भइसी, सांगण महता छइ भली ॥ १ ॥ "

मन्त्री विस्मितः ॥

## एकविंशतितमी कथा । [ २१ ]

विस्मारकः परस्य स्या– दुपदेष्टा नरः कथम् ? । उपदेष्टुं श्लोकयुग–ध्यायी भरटको यथा ॥ १ ॥

शम्बुकग्रामे एको जटी वसति स्म । तत्रत्यस्यैकस्य यजमानस्य पुत्रः परिणीतः, महर्द्धिकत्वेन तत्र भूयांसो लोका मिलिताः । तदा गुरुणा भौतिकेन वधूवरयोर्वेदाङ्गणके उपदेशदानाय मङ्गलमयं श्लोकद्वयं पञ्चषैर्दिनैरुद्घोष्य धारितम् , पुनः पुनः परावृत्त्या च स्थिरी-

१ हे महन् सांगण ! भवतां स्फोटा माषा इव स्फुटन्तु स्फुटन्तु, विदीर्यन्ताम् । यत्रैको बलीवर्दो महिषी च तत्र शोभनमस्ति । २ वइजला–माषाः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कृतम् । ततो देवाङ्गणके बहुलोकसमुदायेन सह वधू-वरयोर्गुरोर्वन्दनार्थमागतयोर्याविज्जटी उपदेशं दातुं प्रवृत्तस्तावता क्षोभात् श्लोकद्वयमपि विस्मृत्य गतम् । ततो बहु उच्चैर्नीचै-र्विलोकनपूर्वं श्लोकस्मारणेऽपि यावता न स्मरति तावता विलक्षीभूतेन भौतिकेनोक्तम्—'द्वयोर्जङ्घिः पततु'। ततो लोकस्तस्याऽतीव मौढ्यं मन्यमानो हास्यपूर्वमुत्थितः ॥

## द्वाविंशतितमी कथा । [ २२ ]

संसर्गं नैव कुर्वीत, प्राज्ञो विज्ञानवर्जितैः । संदेहप्रश्नाज्जटिभिः, सुधीर्धीरहितः कृतः ॥ १ ॥



पाडलपुरे नगरे देवशर्मणो द्विजस्य सोमशर्मा सुतोऽभूत् । स दक्षिणदिशि सरस्वती-लब्धप्रसादचङ्गदेवगुरोः पार्श्वे षोडश वर्षाणि यावता चतुर्दश विद्याः साङ्गोपाङ्गा अधीत्य, पञ्चशतपुस्तकपृष्ठवाहिभिः सह बहुपरिवारोपेतस्तं गुरुं मुत्कलाप्य स्वकीयपुरं प्रति चचाल । गुरुणा शिक्षा दत्ता, यथा—'भोः ! त्वया भरटकानां संगतिर्न कार्या, ग्रामभट्टानां च'। ततः शिरसि शिक्षां लात्वा सोमशर्मा चलितो, मार्गान्तराले आगच्छन् यावता बेडाकग्रामे प्रा-



P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मस्तावता वृष्टौ समागतायाम् अन्यत्रोत्तारकाऽभावात् कस्यचिद् ग्रामभट्टस्य गृहे रात्रौ वासके स्थितः। पुस्तकगोण्यो गृहान्तरुत्तारिताः। रात्रौ ग्रामभट्टेन वार्तासु क्रियमाणासु ग्रामभट्टेन संदेहः पृष्टो यथा—

" ऊंदिराणां तीतरी नाठी, कासां काणा ? । "

" एतस्य गद्यस्य पुरा बहूनामपि पण्डितानां पार्श्वेऽर्थः पृष्टः, परं केनापि नोक्तः । गद्यं तु पूर्वपरम्पराऽऽगतम्, अतो यूयं कथयताऽर्थम् " । ततः पण्डितेन तस्यार्थम् अजानानेन वार्तान्तरैस्तमाक्षिप्य रात्रिर्नीता । प्रातरग्रतश्चलति स्म । द्वितीयदिने तु सूणकग्रामे समागतः पण्डितः, अपरत्र स्थानाऽभावाद् भरटकमठ्यामेव स्थितः । ततस्तैरपि संदेहः पृष्टो यथा—

"जथडि भुंजंति भरड भसंगी, सुखी गोरी उरि पांडुरी । ताथडि भुंजंति भंभा देवी, सपतपताल भस भम" ॥१॥

" एतस्य श्लोकस्यार्थः पुरा केनापि पण्डितेन नाऽकथि, अतो भवन्तः कथयन्तु " । पण्डितस्तं श्लोकं श्रुत्वा तदर्थमजानानः श्यामास्यश्चिन्तयति—" अहो ! अहं गुरुणा कि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मपि तथाविधं न भाणितो येन यत्तल्लोकानामुत्तरदानेऽपि समर्थो भवामि, अतः किं गृहगमनेन ?। प्रथमकवले एव मक्षिकापातः। स्थानद्वयेऽपि संदेहद्वयम् अकिञ्चिज्ज्ञैः पृष्टं, तन्मध्ये एकोऽपि संदेहो न ज्ञातो न च भग्नः। ततः पश्चाद्गत्वा पुनरध्येम "। इति विमृश्य पुनः पश्चाद् गुरुपार्श्वे गतः, कथितं च गुरोः–" भोः श्रीगुरुमिश्राः ! प्रभुभिरहं किं भाणितः?। यतः स्वस्थाने गच्छतो मम संदेहौ मूर्खाभ्यां पृष्टौ, तावपि न भग्नौ, ततोऽग्रतः किं गच्छामि ? "। इत्युक्त्वा तत् संदेहद्वयं गुरोः पार्श्वे पृष्टम्, परं गुरुरपि न वेत्ति। ततो गुरुणा रात्रौ सरस्वतीमाराध्य तत्संदेहद्वयं पृष्टम्। तदा भारत्योक्तम्–" इदं गद्य–पद्यरूपं कूटद्वयं वर्तते, तेन तस्यार्थो न ज्ञायते। ततः शृणु एतयोः सत्यपाठो, यथा–

" इन्द्रियाणां तृप्तिर्नास्ति कस्मात् कारणात् ?। "

" अयं ग्रामभट्टोक्तगद्यस्य सत्यः पाठः। तथा भरटकपृष्टश्लोकस्यायं सत्यपाठो यथा–

" यत्र भुञ्जति भस्माङ्गो, मूर्खो वा यदि पण्डितः। तत्र भुञ्जाम्यहं देवि !, सपत्नीको भवे भवे ॥१॥ "



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः सत्यपाठो गुरुणा प्रातः शिष्याग्रे प्रोक्तः। पुनः प्रोक्तम्—' अतः परं भवता सर्वप्रकारैर्ग्रामनट्ट-जरटकयोः संसर्गो वर्जनीयः। ततः सोमशर्मा गुरुवचसा कुसंगतिं वर्जयन् क्रमेण स्वपुरे समागतः, स्वविद्यया च सर्वमान्योऽभूत् ॥

## त्रयोविंशतितमी कथा। (२३)

यः प्रोक्तं नाऽवबुध्येत, कार्यकारी भवेन्न सः। यथा जटी कर्षकस्य, गुडमण्डकभक्षकः ॥ १ ॥

विजयपुरे लोलयो नाम जटी कस्मिन्नप्यवसरेऽक्षयतृतीयोत्सवे कस्यचित्कौटुम्बिकस्य गृहे भिक्षार्थं जगाम। तत्र भिक्षायां गुडमिश्रमण्डको लेभे। स जटिना भक्षितः, तस्य जिह्वायां लग्नः। ततो द्वितीयदिने स तदर्थी सन् तस्यैव कौटुम्बिकस्य गृहे गतः। भिक्षायां दीयमानायां तदज्ञावान्न गृह्णाति। ततो धनिकेन पृष्टम्—' जोः! किं मार्गयसि?'। स तन्नामाऽजानानो मौनमालम्ब्य स्थितः। ततो बह्व्यां वेलायां स्वयमेव वक्ति—' कव्यसत्कं देहि'। पुनः पुनस्तदुक्तौ धनिकेनोक्तम्—' जातं जातम्, कव्यसत्कमेव न स्यात्। तद् बहूपक्रमेण

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवति'। ततो जटी वक्ति- 'यथा भवति तथा क्रियताम्'। तदा धनिकेन चिन्तितम्- 'किमेतस्य वपुष्मतो लाभो न गृह्यते?' इति। ततो धनिकेनोक्तम्- 'मया सहाऽऽगच्छ, यथा कल्यसत्कं निष्पाद्यते'। ततः कौटुम्बिको महद् हलं शिरसि निधाय तस्य[1] च मस्तके शीताशनभाण्डिकां स्थापयित्वा क्षेत्रं जगाम। मार्गे गच्छता तेन भौतिकस्योक्तम्- 'भो! यथाऽहं कथयामि तथा त्वया कर्तव्यम्'। तेन मौढ्यादेव ज्ञातं यथा, "अयं वक्ति- यथाऽहं करोमि तथा त्वयापि कार्यमिति"। ततो [2]गव्यूतप्रमाणे क्षेत्रे तौ द्वावपि गतौ। ततो धनिकेनाऽतिभाराक्रान्तेन महद् हलमुत्पाट्य भूमौ क्षिप्तम्, तदा भरटकेन स्वमस्तकस्था भाण्डिकाऽपि तथैव क्षिप्ता। ततो धनिकः क्रुद्धो रक्ताक्षो विरूपाणि भाषयामास, सोऽपि तथैव जजल्प। ततो धनिकोऽतिकोपात् [3]प्राजनमुत्पाट्य पिट्टनाय धावितः, सोऽपि हलमुत्पाट्य धनिकस्य पिट्टनाय धावितः। तदा धनिको भीत्या गृहं प्रति मुष्टिं बद्ध्वा पलायितः, सोऽपि

१ जटिनः। २ क्रोषद्वयप्रमाणे। ३ तोत्रम्। भाषायाम्- पशु हांकवानो परोणो।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जटी पृष्ठो पलायितस्तथैव कव्यसत्कनिष्पत्तये ।। ततोऽग्रे गच्छतो धनिकस्य परिधानवस्त्रं कण्टकेषु लग्नं, भीत्या च न गृहीतम्। जौतिकेनापि तत्र यातेन निजपरिधानं छोटयित्वा तत्र मुक्तम्। अथ तत्र ग्रामासन्ने समागते कौटुम्बिके कयाचिद् धनिकथा भक्ते[2] गच्छन्त्या स्वोत्तरच्छदवस्त्रं कौटुम्बिकाय दत्तम्, स तत् परिधाय गृहे गतः। ततोऽनन्तरागतेन जौतिकेन तस्याः परिधानवस्त्रं कर्षयित्वा परिहितम्, तथैव सोऽपि पृष्ठौ लग्नः। [2]तथा तु कण्टकस्थं वस्त्रद्वयं परिहितम्। अथ कौटुम्बिकः स्वगृहे गत्वा भीत्या [3]वेपमानः कोष्ठिकामध्ये प्रविष्टः, पृष्ठागतो जौतिकोऽपि अपरकोष्ठिकायां तथैव प्रविष्टः। एवं प्रहराद्यनन्तरं मध्यस्थो जौतिको वक्ति– 'किं कव्यसत्कं निष्पन्नं नवा ?' इति। ततो धनिको निर्जयीजूय निर्गतः, जौतिकोऽपि कर्षितः। पुनस्तथैव गुरुमण्डकं दत्त्वा पादयोर्लगित्वा च मठिकां प्रति विसर्जितः। प्रोक्तं च– 'जोः ! त्वयाऽतः परं नागन्तव्यम्। एवं मूर्खा जवन्ति ॥

---

१ भोजनदानाय। २ भक्तदानाय गच्छन्त्या धनिकया कर्षक–भौतिकयोः कण्टकलग्नम्। ३ कम्पमानः।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# चतुर्विंशतितमी कथा । [ २४ ]

अविवेकी नरः प्रायः, प्रोक्तोऽप्यर्थं न बुध्यते । मझख्यादिवचोग्राही, भौतिकोऽत्र निदर्शनम् ॥ १ ॥

राजपुरे पुरे केनापि गृहस्थेन आसन्नग्रामस्था लोकाः सर्वेऽपि भोजनायाकारिताः । तेषां मध्ये एको भौतिको मूर्खः समागतः । पङ्क्तावुपविष्टायां कट्टोरके[1] गृहस्वामिना पानीयं मुक्तम् । ततो भौतिकेन पार्श्ववर्तिजनपार्श्वे पृष्टम्– ' भोः ! किमस्य नाम ? ' । तेनोक्तम्– '[2]म झखि ' इति । ततो भौतिकेनाऽचिन्ति– ' मझखि इत्यस्य नाम ' । ततः पञ्च पञ्च सरसाः पदशुद्धिमया[3] गणा[4] मुक्ताः । तन्नामपृच्छायां प्रोक्तम्– ' उगा[5] ' इति । पुनर्लपनश्रियाः[6] परिवेषणे नामपृच्छायां ' चुप ' इति । भोजनादनु सर्वेषां ग्रामगमने भोजनव्याख्याने भौतिकेनोक्तं यथा–

" मझखि पडो कटोरडइ, उगा पडिया पंच । अवर न कांई मोठडुं, जेहवो मीठो चुप्प ॥ १ ॥ "

# पञ्चविंशतितमी कथा । [ २५ ]

१ भाषायाम्–कटोरामां, २ झख नहि–लवारी न कर, ३ पडसूंदीनी बनावेली, ४ पूरीओ, ५ न बोल, ६ लापशी ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परोक्तमात्रं यस्तथ्यं, मन्यते बुद्धिवर्जितः । हसनीयः परेषां स, शाखारूढो जटी यथा ॥ १ ॥

एलाकपुरे भूयांसो जौतिका वसन्ति स्म । तत्रैकदा वर्षासन्ने एको दण्डको नाम जौतिकः स्वमठ्यर्थं स्थूणानयनाय वने गतः। तत्रैकस्य वृक्षस्य भृशं प्रांश्वरां शाखां दृष्ट्वा छेदनाय तरोरुपरि चटितः। ततो जौतिकः स्वारूढशाखां मूले छेत्तुं प्रवृत्तः । तदा कैश्चिन्मार्गे गच्छद्भिः पथिकैस्तं तथा कुर्वन्तं दृष्ट्वा प्रोक्तम्–"भो जौतिक मूर्खराज ! मैवं स्वारूढशाखां छिन्धि, यत एवं कुर्वतस्ते स्वारूढशाखाच्छेदे त्वं पतिष्यसि मरिष्यसि च " । इत्युक्त्वा पथिकाः स्वस्थाने गताः । जौतिकेन तु तद्वचनमनाकर्ण्य इव तथैव स्थितेन सा शाखा छिन्ना, भूमौ च पातिता। सोऽपि च तया सहैव पतितः स्वचित्ते चिन्तयति– " पथिका ज्ञानिनः सत्यवादिनश्च । यतस्तदुक्तं सर्वं मिलितमिदं, तथा सति अहमपि सत्यं मृत एव ! " । ततः स जौतिको भूमौ पतित्वा मृत इव स्थितः। न जल्पति, नोत्तिष्ठति, न श्वसिति च । तत आसन्नस्थैर्लोकैरुत्थापितोऽपि नोत्तिष्ठति, वादितोऽपि च न वदति । ततोऽपरजटिनां पुरस्ताल्लोकैरुक्तं यथा– ' भवतां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दण्डको जटी मृत इव पतितोऽस्ति'। तदा तत्र भूयांसो भौतिका मिलिताः। ते 'दण्डको मृत' इति धिया संस्कारणाय यावता कियन्तं मार्गं गतास्तावताऽग्रे द्विमार्गी समागता। तत एके कथयन्ति– 'वामतो यास्यते'। अपरे च वदन्ति– 'दक्षिणतः'। एवं सर्वेऽपि विवदन्ते, न केनापि निर्णयः स्यात्। तावता जम्पानस्थितेन भौतिकेनोक्तम्– "भो! मा विवदत, वयं यदा जीवन्तोऽभूम तदा वाममार्गेणागच्छाम'। ततः कैश्चिदुक्तम्– "अहो! सर्वदाऽयं सत्यभाषी, एतदुक्तं सर्वं सर्वदा सत्यं भवति, ततो वाममार्गेण चलत" इति। ततः सर्वेऽपि भौतिका वाममार्गेण चलिताः, तावता तत्रस्थैः पथिकैरुक्तं यथा– 'भो भौतिका! यूयं महामूर्खाः, एतस्य जीवत एव दाहाय चलिताः'। तैरुक्तम्– 'अयं मृतः'। पथिकैरुक्तम्– 'नायं मृतो, यतो जल्पन्नस्ति'। तावता तैर्जम्पानं मुक्त्वा तत्रस्थः पृष्टः स पथिकज्ञानित्वादिकं सर्वं शपथपूर्वकं वक्ति। तदाऽपरे भौतिका संदेहाद् एवमेव स्थिताः। ततः पथिकैर्महता कष्टेन प्रतिबोधितास्ते स्वस्थाने गताः। सोऽप्युत्थाय स्वस्थाने जगाम जनैर्हास्यमानः॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# षड्विंशतितमी कथा। [ २६ ]

यत्तत् स्वकल्पितं मूर्खैः, शास्त्ररूपेण मन्यते। नदीतटस्थिता यद्वद्, लेखप्रेषकभौतिकाः ॥ १ ॥

बड्डणपपुरे आशीर्धरो नाम मन्त्री भौतिकभक्तोऽभूत्। एकदा भूयांसो भौतिका ग्रामानुग्राममटन्तस्तत्र पुरपरिसरे समाजग्मुः। तदा वर्षाकाले भृशं वृष्टौ जातायामन्तरालवर्तिन्यां वेन्नानद्यां महापूरोऽजनि। तेन पूरेण रुद्धास्ते सन्ध्यायां यावद् बुभुक्षया म्रियमाणाश्चिन्तयन्ति स्म, यथा—" यजमानाशीर्धरस्य मन्त्रिणो लेखप्रेषणेनाऽस्मदागमनं ज्ञाप्यते, यतः सोऽस्माकं बुभुक्षितानां सारां कुर्यात्, अन्यथा बुभुक्षया मरिष्यते आत्मभिः"। इत्यभिप्रायेण सर्वैर्मिलित्वा लेखो लिखितुं प्रारब्धः। तत एकेन पण्डितस्थानीयेन लेखकेनोक्तम्—' लेखः किं संस्कृतेन लिखिष्यते प्राकृतेन वा?'। तावतैकेन गुरुस्थानीयेनोक्तम्—भो मूर्खाः! स मन्त्री भृशं विद्वानस्ति, अतस्तस्य संस्कृतलेख एव युक्तो, न प्राकृतः'। ततोऽपरैर्भौतिकैः स एव गुरुः पृष्टो लेखयति यथा—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

"दस [1]अट्ठ भरडक नदयल तड रह च्छ, असरधर महत! म कर [2]जम भखन मरा"।

इति केवलाक्षरैः संस्कृततया कल्पितैर्लेखः प्रेषितः केनापि तारकहस्तेन। तेन नदीमुत्तीर्य स मन्त्रिणोऽर्पितः। मन्त्रिणा लेखं वाचयित्वा चिन्तितम्—'अहो अस्मद्गुरूणां मौर्ख्यम्!'। अन्तर्हसता तेन ते सर्वेऽप्यन्न-पानप्रेषणेन संतोषिताः॥

## सप्तविंशतितमी कथा। (२७)

दैवादापतिते लोके- व्यसने दुष्यते नरः। सर्वत्रापि यथा मार्गे, मुषितो भौतिकः पुरा ॥ १ ॥

लोटाणकग्रामे कूटको नाम जटी जड्डे। स एकदा गोदावरीतीर्थयात्रायै संघसार्थेन साकं चलितः। मार्गे गच्छतस्तस्य कुत्रापि विषमे चौरैः शकटं लुण्टितम्। पश्चात्तापवान् स निर्गमितसर्वस्वो गृहे जगाम। लोकाश्च तद्ग्रामवास्तव्याः [3]किटिकिल्यर्थं तस्य गृहे आगत्य पृच्छन्ति स्म— "आः! भो भौतिक! किं जातम्?, कथं शकटं लुण्टितम्?, क्व शकटमभूत्?" इत्यादि।

[1] भाषायाम्—अठे, अहीं, अत्र। [2] जेम, यथा। [3] फटकट करवा—माथाकुट करवा।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो जौतिको वदति स्म– " किं क्रियते ? दैववशादेव जातम्। शकटं त्वग्रत एवाजूत्, तथापि लुण्टितम्। पुण्यं कुर्वतोऽपि विरूपं लगति तदा दैवस्यैव दूषणम्" इत्यादि। लोकैरुक्तम्– " अहो जौतिक ! तत् त्वन्मौर्ख्यं यतस्त्वं शकटमग्रेऽकार्षीः, प्रायश्चौरा अग्रे एवापतन्ति "। जौतिको वक्ति– ' किं क्रियते ? एवं जातम् '। पुनरपरस्मिन् लोकवृन्दे समागते तथैव पृच्छायां जौतिकेनोक्तम्– ' शकटं मध्येऽजूत् ' इति। ततो लोकैरुक्तम्– " अहो! ते महती मूर्खता। को नाम शकटं मध्ये करोति ?, चौराणां भूमिस्तु सर्वदाऽपि मध्ये एव भवति " इत्यादि। पुनस्तृतीयलोकवृन्दपृच्छायां जौतिकेनोक्तं यथा– ' शकटं पश्चादजूत् '। तैरुक्तम्– " अहो ! ते महामौढ्यम्, पश्चाच्छकटं को नाम करोति ?। चौराः सर्वेऽप्यग्रे सुभटभीताः पश्चाद् रटितं खटितं ग्रहीतुमापतन्ति "। तदा जटिना तेषां वचनैर्भृशं रुष्टेनोक्तं यथा– " भो लोकाः !

" आगलि लीजइ पाछलि, लीजइ विचि लीजइ। काइउ रे लोको मां उरइ, पेटि पइसी जइ ॥ १ ॥ "

ततः सर्वेऽपि लोका निवृत्ताः स्वस्थाने गताः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

## अष्टाविंशतितमी कथा । [ २८ ]

यथा तथा न कार्येषु, गुरुणाऽपि गुणार्थिना । मूर्खाः शिष्याः प्रयोक्तव्या, यथा ते क्षेत्रसेवकाः ॥ १ ॥

मरुस्थल्यां चक्रपुरे नगरे विकटमिश्रनामा भरटकाचार्योऽभूत् । तस्य भूयांसः शिष्याः स्थूलवपुषोऽभूवन् महामूर्खाः ।

" सकृज्जल्पन्ति राजानः, सकृज्जल्पन्ति पण्डिताः । सकृत् कन्याः प्रदीयन्ते, त्रीण्येतानि सकृत् सकृत् ॥ १ ॥"

इत्यस्य स्थाने—

" [1]सिरिगिरि बोलंति [2]राणा, सिरिगिरि दीजति [3]काणा ।
सिरिगिरि बोलति पंडिया, तीनरि ता सिरिगिरि सिरिगिरि ॥१॥"

युधिष्ठिरस्थाने 'जूठिलु' इत्यादिमहाऽशुद्धपाठपराश्च । एकदा च काले एकस्यां वृष्टौ जातायां भौतिकभक्तैर्नगरवासिभिः [4]कर्षणानि कृतानि, तानि [5]रूढानि प्रौढानि च । पुनर्भाद्रमासे वृष्ट्यभावात्तानि शुष्कीभवन्ति स्म । तत आर्ता लोका आगत्य गुरुभ्यो विज्ञपयन्ति

१ सकृत्–एकवारम् । २ राजानः । ३ कन्याः । ४ बीजान्युप्तानीति तात्पर्यम् । ५ उद्गतानि ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्म, यथा—' कदा वृष्टिर्भविष्यति ?' इति । गुरुणाऽपि ' भविष्यति भविष्यति ' इति वचनात् कियद्दिनानि जना विप्रतारिताः । तत एकेन जनेनागत्य आग्रहात् पृष्टैर्गुरुभिरुक्तम्—' एवं यद्यस्माकं भक्तिं करोषि तदा तव कर्षणे वृष्टिर्भविष्यति '। ततस्तेन गुरोः सा कृता । ततो गुरुणा चिन्तितम्—" ममैतावन्तो यद् गुरुप्रायाः शिष्याः सन्ति ते कस्मिन् कार्ये समेष्यन्ति ?। कुतो लाभो न गृह्यते ?, कुतश्च महत्त्वं नोपार्ज्यते ?" इति । ततो रात्रौ गुरुणा तदीयक्षेत्रं शिष्यपार्श्वाद् वापीतो वारि कर्षयित्वा संपूर्णं कारितम् । प्रातः स कर्षकः स्वक्षेत्रं जलपूरपूर्णं दृष्ट्वा विस्मितः स्वगुरोः प्रभावं लोकानां पुरस्ताद् वर्णयन् विशेषतो भक्तिं चक्रे, अपरेषु च लोकेषु तथैव गुरोर्भक्तिं कुर्वत्सु तदीयक्षेत्रेषु रात्रौ गुरुणा शिष्यैः सेककार्यं कारितम् । एवं लोकमध्ये गुरोर्महिमा जातः । अथ बहुदिनानन्तरमेकेन यजमानेन बहुभक्तिपूर्वं स्वक्षेत्रसेकाय विज्ञप्तं गुरोः। गुरुणोक्तम्— ' तवापि क्षेत्रेऽद्य वृष्टिर्भविष्यति '। ततो गुरुणा रात्रौ तस्यापि क्षेत्रं सेचितम् । एवं प्रत्यहं क्रियमाणे निरन्तरजलकर्षणवहनोद्विग्नैः शिष्यैः प्रोक्तमेकदा- 'अतः परं यः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथयिष्यति स वदिष्यति'। ततोऽपरलोकैस्ते शिष्यास्तत्त्वं पृष्टाः। तैः सम्यक् स्वरूपं सर्वलोकानामुक्तम्। ततो गुरुमहिमा सर्वोऽपि जगाम। एवं गुरुभिर्मूर्खशिष्या न प्रवर्तितव्याः॥

## एकोनत्रिंशत्तमी कथा। (२९)

स्वयमाचरितं मूर्खो, विरूपं वक्ति शङ्कया। भौतिकोऽत्र यथा पूर्वं, लम्बकर्णिप्रभाषकः॥ १॥

वर्धनग्रामे सोमो नाम जटी वसति स्म। स एकदा स्वयजमानस्य लोहकारस्य गृहे भिक्षार्थं जगाम। तदा तद्गृहे [1]विजने [2]लोहकर्णकं पतितं दृष्ट्वा इतस्ततो विलोक्य तं लात्वा स्वमठ्यां समागात्। ततः स शङ्कयैव भिक्षायै तद्गृहे न कदापि याति। [3]धनिकेन बहु विलोकितोऽपि कर्णको यदा न लब्धस्तदा पुनरन्यः कृतः, तस्य मनस्यपि न। एवं बहुदिनेषु गतेषु धनिकेनाऽचिन्ति–'मद्गुरुर्भिक्षायै कुतो नागच्छति?'। ततो यजमानेन भौतिको मार्गे मिलितो निमन्त्रितो यथा–'भो! भवद्भिर्मद्गृहे भिक्षार्थं कस्मान्नागम्यते?, भवता केयं

१ मनुष्यरहिते। २ भाषायाम्–लोढानो कांठो, पाटो, चकर। ३ लोहकारेण।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

'लम्बकाणिः ?' । ततो बहुवारमेवं कथ्यमाने नौतिकेन चिन्तितम्– " नूनं यद्वस्तु मयाऽस्य गृहाद् गृहीतं तस्य ' लम्बकाणिः ' इति नाम, तदनेन ज्ञातम्। यतोऽयं यदा मिलति तदा एवमेव वदति यदुत ' नवतां केयं लम्बकाणिः ' इति । तर्हि यदीयं नार्पयिष्यते तदा न बूटिष्यते "। तत एकस्मिन् दिने तेन स्वयमेवोक्तम्– " नोः ! इयं लम्बकाणिर्नवदीया या त्वया प्रतिदिनं मार्ग्यते। सा मया नवदीया न ज्ञाता तेन गृहीता । नवदीया चेत्तर्हि गृह्यताम् " इति। ततो धनिकेन धूर्तेन ज्ञातम्–' योऽयं मम लोहकर्णो गतोऽनूत् सोऽनेन गृहीतः, ततो मार्गयामि '। इति स मार्गितः। तेन शपथपूर्वं प्रत्यर्पिते लोकैः स नौतिको हसितः। एवं न कार्यम्॥

## त्रिंशत्तमी कथा। [ ३० ]

सुखेन वञ्च्यते मूर्खो, वनिताभिः स्वकल्पनात् । उच्चडुंगरवासिन्या, गेहिन्या[१] नौतिको यथा ॥ १ ॥

करटकग्रामे बहिःस्थपर्वतोपरि मठ्यां कदाग्रही नाम नौतिको वसति स्म सनार्यः। स

१ विलम्बः।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अष्टक-द्वात्रिंशिका ॥२६॥

जौतिकः स्वभार्यायाः शीलं ग्राममध्ये लोकानां पुरस्तादेवं वर्णयति यथा– “ मद्भार्यायाः सदृशी अपरा सती नास्ति । तथा च—

“ इकुपरि इकुपरि डुंगरइ भाई, अवर न देखुं इसी भाई । उंचइ उंचइ कोइ न जाई, ”

इति त्रिपदीं कथयता जौतिकेन लोकानां पुरः स्वभार्यायाः शीले वर्ण्यमाने एकेन धूर्तेन चिन्तितम्– “ नूनमयं मूर्खः स्नेहग्रथिलः स्त्रियः शीलं वर्णयति। स्त्रीषु किं शीलम्?। यतः–

“ काके शौचं द्यूतकारेषु सत्यं, सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता, राजा मित्रं केन दृष्टं श्रुतं वा ? ॥ १ ॥ ”

ततः स धूर्तस्तस्याः स्वरूपज्ञानाय मठ्यां गतः। दृष्टा जौतिकभार्या रूपवती। तयाऽपि तस्य सातिशयं रूपं दृष्ट्वा विजनं च ज्ञात्वा स भोगार्थं प्रार्थितः। तेनापि तस्या वचोऽङ्गीकृतम्। एवं तयोस्तत्रस्थयोः सहसा जौतिको ग्रामात् समागतः। तदंह्रिनिर्घातं श्रुत्वा भीतो धूर्तस्तया कोणे क्षिप्तः। प्रोक्तं च– “ भोः! त्वया न भेतव्यम्। तथा करिष्ये यथा तव विरूपं

एकोनत्रिंशत्तमी त्रिंशत्तमी कथा ॥२६॥

P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किमपि न भविष्यति। प्रतिदिनं त्वयाऽत्रागन्तव्यम्"। तेन तत् प्रतिपन्नम्। ततः सा उत्थाय जौतिकस्य संमुखं गता। उक्तं च स्वपत्युः—"स्वामिनः! अद्य जवतामेकं महाऽरिष्टं [1]जातम-जूत, परं मया क्षेत्रदेवतायै पादयोर्लगित्वा तट्टालनाय विज्ञप्तम्। ततो देवतयोक्तम्—"यदि तव जर्ता चक्षुषोः पट्टं कण्ठे च घण्टिकां बद्ध्वा 'इकुपरि इकुपरि डुंगरइ भाई०' इति पाद-त्रयमुच्चरन् फेरकत्रयं ददाति तदा सर्वमप्यरिष्टं याति"। इति [2]तस्या वचसा जौतिकेन तथा क्रियमाणे धूर्तः—

"आंखि पाटा गलि घंटा, अम्हे मढी मांही।"

इति चतुर्थपादम् उच्चरन् निर्गतस्त्वरितः। ततस्तृतीयफेरानन्तरं जौतिकेनोक्तम्—'हे जद्रे! कोऽयं याति?'। तयोक्तम्—'नाथ! इदं मूर्तं महारिष्टं गच्छदस्ति'। तेन च स्वीकृतम्। एवं स धूर्तः प्रतिदिनं तां जुक्त्वा याति। एवं कियद्दिनानन्तरमेकदा जौतिकेन लोकानां पुर-

१ अशुभम्। २ स्त्रियः।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तात् तथैव प्रोक्तम्– 'इकुपरि इकुपरि डुंगरइ जाईं०' इत्यादि। ततो धूर्तेन चतुर्थपादः प्रोक्तो यथा– 'आंखि पाटा गलि घंटा, अम्हे मढी मांडी'। तच्छ्रुत्वा लोकैः स्वरूपं तस्याश्च शीघ्रं ज्ञातम्, तथापि मूर्खत्वेन जौतिको न वेत्ति स्म। ईदृशा मूर्खा भवन्ति ॥

## एकत्रिंशत्तमी कथा। [ ३१ ]

यो येन बुध्यते कार्यं, तं तथा बोधयेद् बुधः। दग्धकाकादिना भीता, यथा विज्ञेन वारिताः ॥ १ ॥

मरुस्थल्यां सोलोकग्रामे बहवो जौतिका वसन्ति स्म। एकदा ते स्वचक्रपुरस्ताद् यजमानानां वन्दापनाय चलिताः, तैः सह एकः सुविचारः पण्डितोऽपि चलितः। एवं तेषां मार्गे गच्छतां मध्याह्नं जातम्। अतिबुभुक्षितैर्जौतिकैः सर्वतो भक्ष्ये विलोक्यमाने एकं महद् धान्यक्षेत्रं दवाग्निदग्धं दृष्टम्। तन्मध्येऽर्धदग्धान् बहून् काकान् दृष्ट्वा तान् गलमोटनपूर्वं खादितुं प्रवृत्ताः। ततः सुविचारेणोक्तम्– "आः! पापैः किमारब्धम्?। पूर्वं मांसमपि न खाद्यं, किं पुनः काकसत्कम्?। इदं चण्डालोचितं कर्म कस्मादारब्धं भवद्भिः?"। ततस्तैरुक्तम्–



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

'काकाः खाद्या जक्ताः सन्ति'। पण्डितेनोक्तम्-- 'क्व?'। जौतिकैरुक्तम्-- "मातृकायां, यथा-- क ख ग घ ङ इति। केति काकाः, खेति खाद्याः, गेति गलं मोटयित्वा, घेति घनाः, ङेति ङवद् वक्रीकृत्य"। सुविचारेणाऽचिन्ति-- 'मूर्खा एते कल्पिताद् प्रवर्तमानाः कल्पितेनैव वार्या' इति। ततश्चोक्तम्-- 'जो जौतिका! जवतामग्रतो मातृका आयाति'। तैरुक्तम्--'नायाति'। तेनोक्तम्-- 'तर्हि तत्रैवाऽग्रे त थ द ध न इत्यत्र निषिद्धमस्ति'। तैरुक्तम्--'कथम्?'। तेनोक्तम्-- 'तथेति तथापि, दधेति दग्धाः, नेति न खाद्याः'। ततस्तस्य पण्डितस्य वचसा सर्वेऽपि जौतिकाः काकखादनतो निवृत्ताः ॥

## द्वात्रिंशत्तमी कथा। [ ३२ ]

कुर्वन्ति कलहं मूर्खाः, स्वभावेनापि जल्पिते। पण्डितेन समं यद्वद्, मेघघृष्टौ जटी पुरा ॥ १ ॥

देवरमणपुरे दिवाकरः पण्डितोऽजूत्। स एकदाऽपि प्राकृतभाषया न वदति स्म। एकदा वर्षाकाले स पण्डितोऽपरपण्डितेन समं ग्रामाद् बहिर्देहचिन्तायै गतोऽजूत्। यावता स पण्डितः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वगृहं प्रत्यागच्छति तावताऽन्तराले मेघः प्रचुरधाराभिर्वर्षणाय लग्नः। ततः पण्डितोऽवाप्तक्लेदनभयात् कस्यचिद् नौतिकस्य मठ्यां प्रविष्टः। तेन स्वभावेनैव द्वितीयपण्डितस्योक्तं यथा-- 'वर्षन्ति मेघाः'। जटिना तद्वचः श्रुत्वाऽचिन्ति– 'नूनमयं विद्वान् मां दृष्ट्वा गुप्तगालिं ददानोऽस्ति'। ततो नौतिक उत्थाय पण्डितस्य वस्त्राञ्चले विलग्नो वक्ति-- 'मम गर्दभत्वेन गालिं कस्माद्ददासि ?'। पण्डितेनोक्तम्— 'कथम् ?'। तेनोक्तम्– "शृणु यथा-- 'वर्षन्ति मेघा' इति त्वयोक्तम्। अग्रतस्त्वेवं ज्ञायते यथा-- 'उंघंति निद्रां आचरन्ति मेषा गर्दभाः'। इति मां गर्दभं कुर्वाणोऽसि"। पण्डितेनोक्तम्-- 'मैवं वद, अरे! मया स्वभावेनोक्तम्'। नौतिको वक्ति-- 'मा कूटं वद, त्वया मम गुप्ता गालिर्दत्ता, राज्ञोऽग्रे चल'। एवं कलहं कुर्वाणो लोकैः कष्टेन वारितः। ततः पण्डितो हृष्टः स्वगृहं जगाम ॥

तपागणाधीश्वर सोमसुन्दरा- ऽन्तेवासिनो वाचकचक्रचक्रिणः।
श्रीसाधुराजादधिगम्य कौतुका- दलेखि शिष्येण यथाश्रुतं त्वियम् ॥ १ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust